नं.१५८

नं. ६००

महानिर्वाणतंत्र

नं. १६४८

3

महानिर्वाणतंत्रम्



ॐ नमः शिवाय नमः गिरीन्द्रशिखरे रम्ये नानारत्नो
पशोभिते नानावृक्षलताकीर्णे नानापक्षिविरुते स
र्वर्त्तुकुसुमामोदमोदिते सुमनोहरे शैत्यसौगन्ध्य
मान्द्याढ्यमरुद्भिरुपवीजिते अप्सरोगणसंगीतक
लध्वनिनिनादिते स्थिरच्छायद्रुमच्छायाच्छादिते स्नि
ग्धमञ्जुले मत्तकोकिलसन्दोहसंघुष्टविपिनान्तरे
सर्वदा स्वगणैः सार्द्धम् ऋतुराजनिषेविते सिद्धचारण
गन्धर्वगाणपत्यगणैर्वृते तत्र मौनधरं देवं चराच
रजगद्गुरुम् सदाशिवं सदानन्दं करुणामृतसागरं
कर्पूरकुन्दधवलं शुद्धसत्त्वमयं विभुम् दिगम्बरं दी
ननाथं योगीन्द्रं योगिवल्लभम् गंगाशीकरसंसिक्त
जटामण्डलमण्डितम् विभूतिभूषितं शान्तं व्यालमा
लेकपालिनम् त्रिलोचनं त्रिलोकेशं त्रिशूलवरधा
रिणम् आशुतोषं ज्ञानमयं कैवल्यफलदायकम् नि
र्विकल्पं निरातङ्कं निर्विशेषं निरंजनम् सर्वेषां हि
तकर्त्तारं देवदेवं निरामयम् प्रसन्नवदनं वीक्ष्य लो
कानां हितकाम्यया विनयावनता देवी पार्वती शिव
मब्रवीत् श्रीपार्वत्युवाच देवदेव जगन्नाथ मन्नाथ
करुणानिधे त्वदधीनास्मि देवेश तव वाक्यानुकारिणी स
दा विना त्वया मया किञ्चिद्भाषितुं नैव शक्यते कृपाव
लेशो मयि चेत्तव स्नेहोऽस्ति यदि मां प्रति तदा निवेदितुं किं
चिन्मनसा यद्धि वाञ्छितम् तदन्यः संशयस्यास्य कस्त्रिलो

कांमहेश्वर छेत्ताभावितमहोंवा सर्वज्ञः सर्वशास्त्रवि
त् सदाशिव उवाच किमुच्यते महाप्राज्ञे कथ्यतां प्रा
णवल्लभे यदकथ्यं गणेशेऽपि स्कन्दे सेनापतावपि
तवाग्रे कथयिष्यामि सुगोप्यमपि यद्भवेत् किमस्ति
त्रिषु लोकेषु गोपनीयं तवाग्रतः मम रूपासि देवि
त्वं न भेदोऽस्ति त्वया मम सर्वज्ञा किं न जानासि त्वं न
भिज्ञेव पृच्छसि इति देववचः श्रुत्वा पार्वती हृष्टमा
नसा विनयावनता साध्वी परिपप्रच्छ शंकरम्
श्रीपार्वत्युवाच भगवन् सर्वभूतेश सर्वधर्मविदांव
र कृपावता भगवता ब्रह्मान्तर्यामिना पुरा प्रका
शिताश्चतुर्वेदाः सर्वधर्मोपबृंहिताः वर्णाश्रमा
दिनियमा यत्र चैव प्रतिष्ठिताः तदुक्तयोगयज्ञा
द्यैः कर्मभिर्भुवि मानवाः देवान् पितॄन् प्रीणयं
तः पुण्यशीलाः कृते युगे स्वाध्यायध्यानतपसाद
यादानैर्जितेन्द्रियाः महाबला महावीर्या महास
त्वपराक्रमाः देवायतनगामश्चदेवकल्पा दृढव्र
ताः सत्यधर्मपराः सर्वे साधवः सत्यवादिनः राजा
नः सत्यसंकल्पाः प्रजापालनतत्पराः मातृवत् प
रयोषितं स पुत्रवत् परसूनुषु लोष्टवत् परवित्ते
षु पश्यंतो मानवास्तदा आसन् स्वधर्मनिरताः स

म॰ हा॰ ते॰ २ प्र॰

दासन्मार्गवर्त्तिनः नमिथ्याभाषिणः केचित्नप्रमा
दरताः क्वचित् नचौरानपरद्रोहकारकानडराशयाः
नमत्सरानातिकृष्टानानिलव्यानकामुकाः सदंतः
करणाः सर्वेसर्वदानन्दमानसाः भूमयः सर्वशस्या
ढ्याः पर्जन्याः कालवर्षिणः गावोऽपिदुग्धसम्पन्नाः
पादपाः फलशालिनः नाकालमृत्युस्तत्रासीत्नदु
र्भिक्षंनवारुजः हृष्टाः पुष्टाः सदारोग्यास्तेजोरूपगु
णान्विताः स्त्रियोनव्यभिचारिण्यः पतिभक्तिपराय
णाः ब्राह्मणाः क्षत्रियावैश्याः शूद्राः स्वाचारवर्त्तिनः
स्वैः स्वैर्धर्म्मैर्यजेतस्तेनिस्तारपदवींगताः कृतेव्य
तीतेत्रेतायांदृष्ट्वाधर्म्मव्यतिक्रमम् वेदोक्तकर्म्मभि
र्मार्गंनशक्ताः स्वेष्टसाधने बहुक्लेशकरंकर्म्मवै
दिकंभूरिसाधनं कर्त्तुंनयोग्यामनुजाश्चिन्ताव्याकु-
लमानसाः स्वकृत्यंकर्त्तुंनचार्हन्ति सदाकातरचेतसः
वेदार्थप्रकाशशास्त्राणिस्मृतिरूपाणिभूतले नदावे
प्रकटीकृत्यतपःस्वाध्यायदुर्बलान् लोकानतार
यःपापातदुःखशोकामयप्रदात् त्वांविनाको
ऽस्तिजीवानांघोरसंसारसागरे भक्तापातासमु
द्धर्त्तापितेवत्प्रियकृत्प्रभुः ॥
॥ ।

ततोः पिश्चापरे प्राप्ते स्मरस्तकसङ्कुलोज्झिते य॰
र्म्मोड्डलोपे मनुजे आधिव्याधिसमाकुले संहिता
युपदेशेन नैवैवोद्धारिता नराः आयाते पापिनि
कलौ सर्व्वधर्म्मविलोपिनि दुराचारे दुस्सपंचे दुष्ट
कर्म्मप्रवर्त्तके नवेदाः प्रभवन्त्यत्र स्मृतीनां स्मरणं
कुतः नानेतिहासपुकानां नानामार्गप्रदर्शिनाम्
बहुलानां पुराणानां विनाशो भविता विभो तदा
लोका भविष्यन्ति धर्म्मकर्म्मबहिर्म्मुखाः उच्छृङ्खला
मदोन्मत्ताः पापकर्म्मरताः सदा कामुका लोलुपाः
क्रूरा निष्ठुरा दुर्म्मुखाः शठाः स्वल्पायुर्म्मन्दमतयो
रोगशोकसमाकुलाः निःश्रीका निर्बला नीचानी
चाचारपरायणाः नीचसंसर्गनिरताः परवित्ताप
हारकाः परनिन्दापरद्रोहपरीवादपराः खलाः
परस्त्रीहरणे पापाः शङ्काभयविवर्ज्जिताः नि
र्द्दना मलिना दीना दरिद्रा स्थिरवैरिणः विप्राः शू
द्रसमाचाराः सन्ध्यावन्दनवर्ज्जिताः अयाज्यया
जकालुब्धा दुर्वृत्ताः पापकारिणः असत्यभाषिणो
मूर्खा दाम्भिका दुस्सपंचकाः कन्याविक्रयिणो॰
ग्रामालयो व्रतपरांमुखाः लोकप्रतारणार्थाय

म॰
नि॰ त॰
१
प॰
3

जपपूजापरायणाः पाखण्डाः पतितकर्म्माणः श्र
द्धाभक्तिविवर्ज्जिताः कदाहाराः कदाचाराः धूर्त
काः शूद्रसेवकाः शूद्रान्नभोजिनः क्रूरा वृषली
रतिकामुकाः दास्यन्ति धनलोभेन स्वदारान्नी
चजातिषु ब्राह्मण्यचिह्नमेतावत्केवलंसूत्र
धारणम् नैवपानादिनियमो भक्ष्याभक्ष्य
विवेचनम् धर्म्मशास्त्रे सदा निन्दा सा
धुद्रोहो निरन्तरम् सत्कथालाप
मात्रंच न तेषां मनसि क्वचित्
त्वया कृतानि तन्त्राणि जीः
वोद्धारणहेतवे निग
मागमजातानि भु
क्तिमुक्तिकरा
णि च देवी
नां यत्र
।।।।।।
।।।।
।।।
।।

देवानां मंत्रयंत्रादिसाधने कथिता वहवो न्यासाः
सृष्टिस्थित्यादिलक्षणाः वहुपद्मासनादीनि गाद
तान्यपि भूरिशः पशुवीरदिव्यभावादेवतामंत्रसि
द्धिदाः शवासने चितारोहो मुण्डसाधनमेव च लता
साधनकर्माणि त्वयोक्तानि सहस्रशः पशुभावदि
व्यभावौ स्वयमेव निवारितौ कलौ न पशुभावोऽस्ति
दिव्यभावः कुतो भवेत् पत्रपुष्पफलतोयस्वयमेवा
हरेत्पशुः न शूद्रदर्शनं कुर्यात् मनसा न स्त्रियं स्म
रेत् दिव्यश्च देवताप्रायः शुद्धान्तःकरणः सदा द्वन्द्वा
तीतो वीतरागः सर्वभूतसमः क्षमी कलिकल्मषयु
क्तानां सर्वदा स्थिरचेतसाम् निद्रालस्यप्रसक्तानां
भावशुद्धिः कथं भवेत् वीरसाधनकर्माणि पंचत
त्वोदितानि च मद्यमांसं तथा मत्स्यमुद्रामैथुनमेव
च एतानि पंचतत्वानि त्वया प्रोक्तानि शंकर कलि
जा मानवा लुब्धाः शिश्नोदरपरायणाः लोभात्तत्र पति
ष्यंति न करिष्यंति साधनम् इन्द्रियाणां सुखार्थाय पी
त्वा च बहुलं मधु भविष्यंति मदोन्मत्ता हिताहितवि
वर्जिताः परस्त्रीधर्षकाः केचिद्दस्यवो बहवो भुवि न
करिष्यंति ते मत्ताः पापाशक्तिहीना बुद्धिहीना भूत्वा
च विकलेन्द्रियाः हृदे गर्ते प्रांतरे च प्रासादात्पर्वता
दपि पतिष्यंति मरिष्यंति मनुजा मदविह्वलाः केचि
द्विवादयिष्यंति गुरुभिः स्वजनैरपि केचिन्मौनाश्रित

प्रायाश्चपरेबहुजल्पकाः अकार्य्यकारिणःक्रूराध
र्म्ममार्गविलोपकाः हितााययानिकर्म्माणिकथिता
नित्वयाप्रभो मन्येतानिमहादेवविपरीतानिमान
वे केवायोगंकरिष्यन्तिन्यासजातानिकेऽपिवा स्तोत्र
पाठंयंत्रलिपिंपुरश्चर्य्यांजगतःपते युगधर्म्मप्रभावे
णस्वभावेनकलौनराः भविष्यन्तिदुर्हृताःसर्वथा
पापकारिणः तेषामुपायंदीनेशकृपयाकथयप्रभो
आयुरारोग्यवर्च्चस्यंबलवीर्य्यविवर्द्धनम् विद्याबुद्धि
प्रदंनृणामप्रयत्नशुभंकरम् येनलोकाभविष्यन्ति
महाबलपराक्रमाः शुद्धचित्ताःपरहितामातापित्रोः
प्रियंकराः स्वदारनिष्ठाःपुरुषाःपरस्त्रीषुपराङ्मुखाः
देवतागुरुभक्ताश्चपुत्रस्वजनपोषकाः ब्रह्मज्ञाब्र
ह्मविद्याश्चब्रह्मचिंतनमानसाः सिद्ध्यर्थंलोकयात्रा
याःकथयस्वहिताययत् कर्त्तव्यंयदकर्त्तव्यंवर्णाश्र
मविभेदतः विनात्वांसर्वलोकानांकस्त्राताभुवनत्र
ये इतिश्रीमहानिर्वाणतंत्रेसर्वतंत्रोत्तमोत्तमेस
र्वधर्म्मनिर्णयसारेश्रीमदाद्यासदाशिवसंवादेजी
वनिस्तारोपायप्रश्नः प्रथमोल्लासः इतिदेव्याव
चश्रुत्वाशंकरोलोकशंकरः कथयामासतत्वेनम
हाकारुण्यवारिधिः श्रीसदाशिवउवाच साधुपृष्टं
महाभागेजगतांहितकारिणि एतादृशःशुभःप्र
श्नोनकेनापिपुराकृतः धन्यासिसुकृतज्ञासिहितासि

कलिजन्मनाम् यद्यदुक्तं त्वया भद्रे सत्यं सत्यं यथार्थ
तः सर्वज्ञासि त्रिकालज्ञा धर्मज्ञा परमेश्वरि भूतं भवद्भ
विष्यच्च धर्मं प्रोक्तं त्वया प्रिये यथातथ्यं यथान्यायं यथा
योग्यं न संशयः कलिकल्मषदीनानां द्विजादीनां द्विजा
दीनां सुरेश्वरि मेध्यामेध्यविचाराणां न शुद्धिः श्रौतकर्म
णा न संहिताद्यैः स्मृतिभिरिष्टसिद्धिर्नृणां भवेत् सत्यं
सत्यं पुनः सत्यं सत्यं सत्यं मयोच्यते विनाह्यागममार्गेण
कलौ नास्ति गतिः प्रिये श्रुतिस्मृतिपुराणादौ मयैवोक्तं
पुरा शिवे आगमोक्तविधानेन कलौ देवान्यजेत्सुधीः
कलावागममुल्लङ्घ्य योऽन्यमार्गे प्रवर्त्तते न तस्य गतिर
स्तीति सत्यं सत्यं न संशयः सर्वैर्वेदैः पुराणैश्च स्मृति
भिः संहितादिभिः प्रतिपाद्योऽस्मि नान्योऽस्ति प्रभुर्ज्ज
गति मां विना आमनन्ति च ते सर्वे मत्पदं लोकपावन
म् मन्मार्गविमुखा लोकाः पाषण्डा ब्रह्मघातिनः अतो
मन्मतमुत्सृज्य यो यत्कर्म समाचरेत् निष्फलं त
द्भवेद्देवि कर्त्तापि नारकी भवेत् मूढो मन्मतमुत्सृज्य
योऽन्यमतमुपाश्रयेत् ब्रह्महा पितृहा स्त्रीघ्नः स भवे
न्नात्र संशयः कलौ तन्त्रोदिता मन्त्राः सिद्धास्तूर्णफलप्र
दाः शस्ताः कर्मसु सर्वेषु जपयज्ञक्रियादिषु निर्वीर्याः
श्रौतजातीया विषहीनोरगा इव सत्यादौ सफला आस
न्कलौ ते मृतका इव पाञ्चालिका यथा भित्तौ सर्वेन्द्रिय
समन्विताः अमूरशक्ताः कार्येषु तथान्ये मन्त्रराशयः

म. नि. तं. द्वि. ५

अन्यमंत्रैः कृतं कर्म्म वन्ध्यास्त्रीसंगमो यथा न तत्र फल
सिद्धिः स्याच्छ्रम एव हि केवलम् कलावन्योदितैर्म्मार्गैः
सिद्धिमिच्छति यो नरः तृषितो जाह्नवीतीरे कूपं खनति
दुर्म्मतिः मद्वक्त्राद् दितं धर्म्मं हित्वान्यत् धर्म्ममीहते अ
मृतं स्वगृहे हित्वा क्षीरमार्कं स वाञ्छति नान्यः पंथा मुक्ति
हेतुरिहामुत्र सुखाप्तये यथा तंत्रोदितो मार्गो मोक्षाय
च सुखाय च तंत्राणि बहुधोक्तानि नानाख्यानान्विता
नि च सिद्धानां साधकानां च विधानानि च भूरिशः अधि
कारिविभेदेन पशुबाहुल्यतः प्रिये कुलाचारोदितं धर्म्म
गुप्त्यर्थं कथितं क्वचित् जीवब्रह्मैक्यकारीणि कानिचित्
कथितान्यपि देवा नानाविधाः प्रोक्ता देव्योऽपि बहुधा
प्रिये भैरवाश्च वैतालावटुका नायिकागणाः शाक्ताः
शैवा वैष्णवाश्च सौरा गाणपतादयः नानामंत्राश्च यंत्राणि
सिद्धोपायास्त्वनेकशः भूरिप्रयाससाध्यानि यथोक्तफल
दानि च यथा यथा कृताः प्रश्ना येन येन यदा यदा तदा
तस्योपकाराय तथैवोक्तं मया प्रिये सर्वलोकोपकारा
य सर्वप्राणिहिताय च युगधर्म्मानुसारेण याथातथ्ये
न पार्वति त्वया यादृक् कृताः प्रश्ना न केनापि पुरा कृताः
तव स्नेहेन वक्ष्यामि सारात्सारं परात्परम् वेदानामा
गमानां च तंत्राणां च विशेषतः सारमुद्धृत्य देवेशि त्वा
येकथ्यते मया यथा नरेषु तंत्रज्ञाः सरितां जाह्नवी यथा
यथाहं त्रिदिवेशानामागमानामिदं तथा किं वेदैः किं पु

गणेस्य किंशास्त्रैर्वहुभिः शिवे विज्ञातेऽस्मिन्महादे
वे सर्वसिद्धीश्वरो भवेत् यतोजगन्मंगलायत्वयाहं
विनियोजितः अतस्तेकथयिष्यामियद्विश्वहितकृ
द्भवेत् कृते विश्वहिते देवि विश्वेशः परमेश्वरि प्रीतो
भवतिविश्वात्मायतोविश्वंतदाश्रितम् सएकएवस
द्रूपः सत्योऽद्वैतः परात्परः स्वप्रकाशः सदापूर्णः स
च्चिदानन्दलक्षणः निर्विकारोनिराधारोनिर्विशेषो
निराकुलः गुणातीतः सर्वसाक्षीसर्वात्मासर्वदृग्विभुः
गूढः सर्वेषुभूतेषुसर्वव्यापीसनातनः सर्वेन्द्रियगुणा
भासः सर्वेन्द्रियविवर्जितः लोकातीतोलोकहेतुरवा
ङ्मनसगोचरः सवेत्तिविश्वंसर्वज्ञस्तंनजानातिकश्च
न तदधीनंजगत्सर्वंत्रैलोक्यंसचराचरम् तदाल
म्बनतस्तिष्ठेदवितर्क्यमिदंजगत् तत्सत्यतामुपाश्रि
त्यसद्वद्भातिपृथक्पृथक् तेनैवहेतुभूतेनवयंजाता
महेश्वरि कारणंसर्वभूतानांसएकः परमेश्वरः लोके
षुसृष्टिकरणात्स्रष्टाब्रह्मेतिगीयते विष्णुःपालयि
तादेविसंहर्ताहंतदिच्छया इन्द्रादयोलोकपालाः स
र्वेतद्वशवर्तिनः स्वेस्वेऽधिकारेनिरतास्तेशासतित
दाज्ञया त्वंपराप्रकृतिस्तस्यपूज्यासिभुवनत्रये तेनां
तर्यामिरूपेणतत्तद्विषययोजिताः स्वस्वकर्मप्रकुर्व
न्तिनस्वतन्त्राः कदाचन यद्भयाद्वातिवातोऽपिसूर्यस्त
पतियद्भयात् वर्षन्तितोयदाः कालेपुष्प्यन्तितरवोवने

म
हा नि
तं
६

6

कालंकालयतेकालेमृत्योर्मृत्युर्भियोभयम् वेदांतवे
द्योभगवानयत्तच्छब्दोपलक्षितः सर्वेदेवाश्चदेव्यश्च
तन्मयाःसुरवन्दिते आब्रह्मस्तम्बपर्यन्तंतन्मयंसक
लंजगत् तस्मिंस्तुष्टेजगत्तुष्टंप्रीणितेप्रीणितंजगत्
तदाराधनतोदेविसर्वेषांप्रीणनंभवेत् तरोर्मूलाभिषे
केणयथातद्भुजपल्लवाः तृप्यन्तितदनुष्ठानात्तथास
र्वेऽमरादयः यथातवाह्वानाद्ध्यानात्पूजनाज्जपनात्
प्रियेभवन्तितुष्टाःसर्वेपितथाजानीहिसुव्रते यथागा
च्छन्तिसरितोऽवशेनापिसरित्पतिम् तथाह्यादीनिक
र्माणितदुद्देश्यानिपार्वति योयोयान्यान्यजेद्देवान्
श्रद्धयायद्यदाप्तये तत्तद्ददातिसोऽध्यक्षस्तैस्तैर्देवग
णैःशिवे बहुनात्रकिमुक्तेनतत्वात्रकथ्यतेप्रिये ध्येयः
पूज्यःसुखाराध्यस्तंविनानास्तिमुक्तये नायासोनोपवा
सश्चकायक्लेशोनविद्यते नैवाचारादिनियमानोपचा
राश्चभूरिशः नदिक्कालविचारोऽस्तिनमुद्रान्याससंहृ
तिःयत्साधनेक्लेशानितेविनाकोऽन्यमाश्रयेत् ॥
इतिश्रीमहानिर्वाणतन्त्रेसर्वतन्त्रोत्तमोत्तमेसर्वधर्मनि
र्णयसारेश्रीमदाद्यासदाशिवसंवादेजीवनिस्तारोपाय
प्रश्नोत्तरेब्रह्मोपासनक्रमोनामद्वितीयोल्लासः तृती
योल्लासः॥ श्रीदेव्युवाच देवदेवमहादेवदेवतानांगुरो
र्गुरो वक्तासिसर्वशास्त्राणांमन्त्राणांसाधनस्यच कथितंय
त्परंब्रह्मपरमेशंपरात्परं यस्योपासनतोमर्त्याभुक्तिंमुक्तिं
चविन्दति॥

केनोपायेनभगवन्परमात्माप्रसीदति किंतस्य
साधनेदेवमंत्रःकोवाप्रकीर्त्तितः किंध्यानंकिंवि
धानंचपरेशस्यपरात्मनः तत्त्वेनश्रोतुमिच्छामिकृप
याकथयप्रभो श्रीसदाशिव उवाच शृणुगुह्यंपरंत
त्त्वंशृणुमत्प्राणवल्लभे रहस्यमेतत्कल्याणिनकु
त्रापिप्रकाशितम् तवस्नेहेनवक्ष्यामिममप्राणाधि-
कंपरम् ज्ञेयंभवतितद्ब्रह्मसच्चिद्विश्वमयंपरम् य
थातथ्यस्वरूपेणलक्षणैर्वामहेश्वरि सत्तामात्रंनिर्वि
शेषमवाङ्मनसगोचरम् असत्त्रिलोकीसद्भानंस्व
रूपंब्रह्मणःस्मृतम् समाधियोगैस्तद्वेद्यंसर्वत्रसम
दृष्टिभिः द्वन्द्वातीतैर्निर्विकल्पैर्देहात्माध्यासवर्जितैः
यतोविश्वंसमुद्भूतंयेनजातंचतिष्ठति यस्मिन्सर्वा-
णिलीयंतेज्ञेयंतद्ब्रह्मलक्षणैः स्वरूपबुद्ध्यायद्वेद्यंत
देवलक्षणैःशिवे लक्षणैराप्तुमिच्छूनांविहितंतत्रसा
धनम् तत्साधनंप्रवक्ष्यामिशृणुष्वावहिताप्रिये त
त्रादौकथयाम्याद्येमंत्रोद्धारंमहेशितुः प्रणवंपूर्वमु
द्धृत्यसच्चित्पदमुदाहरेत् एकपदांतेब्रह्मेतिमंत्रो
द्धारःप्रकीर्तितः संधिक्रमेणमिलितःसप्तार्णोऽयम
नुःस्मृतः तारहीनेनदेवेशिषड्वर्णोऽयंमनुर्भवेत्
सर्वमंत्रोत्तमःसाक्षाद्धर्मार्थकाममोक्षदः नात्रसिद्धा
द्यपेक्षास्तिनारिमित्रादिदूषणम् नतिथिर्नचनक्षत्रं
नराशिगणनंतथा कुलाकुलादिनियमोनसंस्कारो-

म॰
नि॰ तं॰
८

त्र विद्यते सर्वथा सिद्धमंत्रोयं येनात्र कार्य्याविचारणा बहु
जन्मार्ज्जितैः पुण्यैः सद्गुरुर्यदि लभ्यते तदा तद्वक्त्रतो॰
लब्ध्वा जन्मसाफल्यमाप्नुयात् चतुर्वर्गः करे कृत्वा परत्रेह च
मोदते स धन्यः स कृतार्थश्च स कृती स च धार्म्मिकः सस्ना
तः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः सर्वशास्त्रेषु निस्नातः
सर्वलोकप्रतिष्ठितः यस्य कर्णपथायात प्राप्तो मंत्रमहा
मणिः धन्या माता पिता तस्य पवित्रं तत्कुलं शिवे पित
रस्तस्य संतुष्टा मोदंते त्रिदशैः सह गायंति गायंती गाथां
पुलकांकितविग्रहाः अस्मत्कुले कुलश्रेष्ठो जातो ब्रह्मो
पदेशिकः किमस्माकं गयापिंडैः किं तीर्थश्राद्धतर्पणैः
किं दानैः किं जपैर्होमैः किमन्यैर्बहुसाधनैः वयमक्षय
तृप्ताः स्मः सत्पुत्रस्यास्य साधनात् शृणु देवि जगद्वंद्ये
सत्यं सत्यं मयोच्यते परब्रह्मोपासकानां किमन्यैः साधनां
तरैः मंत्रग्रहणमात्रेण देही ब्रह्ममयो भवेत् ब्रह्मभूत
स्य देवेशि किमप्राप्यं जगत्त्रये किं कुर्वंति ग्रहाः सर्वे वे
ताला श्चेटकादयः पिशाचा गुह्यका भूता डाकिनी मातृ
कादयः तस्य दर्शनमात्रेण पलायंते पराङ्मुखाः रक्षितो ब्र
ह्ममंत्रेण प्रावृतो ब्रह्मतेजसा किं बिभेति ग्रहादिभ्यो मा
र्त्तंड इव चापरः ते दृष्ट्वा भयमापन्नाः सिंहं दृष्ट्वा यथा गजाः
विद्रवंति च नश्यंति पतंगा इव पावके न तस्य दुरितं किं
चिद्ब्रह्मनिष्ठस्य देहिनः सत्यपूतस्य शुद्धस्य सर्वप्राणिहि
तस्य च को वोपद्रवमतिच्छेदात्मापघातकं विना येद्रुस

निवेलाः पापाः परब्रह्मोपदेशिने स्वच्छोहं ते प्रकुर्व
तिनानितिरिक्तायतः सतः सतत्सर्वहितः साधुः सर्वेषां
प्रियकारकः तस्मान्निष्टे कृते देवि कोवास्यान्निरुपद्रवः
मंत्रार्थं मंत्रचैतन्यं योन जानाति साधकः शतलक्षप्रज
प्तोऽपि तस्य मंत्रोन सिध्यति अतोऽस्यार्थं च चैतन्यं कथ
यामि शृणु प्रिये अकारेण जगत्पाता संहर्ता स्यादुकार
तः मकारेण जगत्स्रष्टा प्रणवार्थ उदाहृतः सच्चेहृन
सदाद्यायि विच्चैतन्यं प्रकीर्तितम् एकमेद्वैतमीशानि
हृहताद्ब्रह्म गीयते मंत्रार्थः कथितो देवि साधकाभी
ष्टसिद्धिदः मंत्रचैतन्यमेतद्धि तदधिष्ठात्रदेवता तत्त
त्तानेपरमेशानि भक्तानां सिद्धिदायकम् तस्याधिष्ठात्र
देवेशि सर्वव्यापि सनातनम् अवितर्क्यं निराकारं वा
चातीतं निरंजनम् वाङ् माया कमलाद्येन तारहीनेन
पार्वति दीयते विविधा विद्या माया श्रीः सर्वतोमुखी ता
रेण तारहीनेन प्रमेके सकलं पदम् युग्मयुग्मक्रमे
णापि मंत्रोऽयं विविधो भवेत् ऋषिः सदाशिवोस्य
छन्दोऽनुष्टुबुदाहृतम् देवता परमं ब्रह्म सर्वांतर्या
मि निर्गुणम् चतुर्वर्गफलावाप्त्यै विनियोगः प्रकीर्तितः
अंगन्यासकरन्यासौ कथयामि शृणु प्रिये तारं सविन्दुक
मिति ब्रह्मेति सकलं ततः अंगुष्ठतर्जनीमध्यानामिका
स्तमहेश्वरि कनिष्ठयोः करतलपृष्ठयोः सरवह्निते
नमः स्वाहा वषट् हुं वौषट् फडितेऽथ यथाक्रमम् मासे

म॰
नि॰ तं॰
५॰
८

न्यासोक्तविधिना साधकः सुसमाहितः हृदादिकर
पर्य्यन्तमेवमेव विधीयते प्राणायामं ततः कुर्य्यान्मू
लेन प्रणवेन वा मध्यमानामिकाभ्यां च दक्षहस्तस्य
पार्वति वामनासापुटे धृत्वा दक्षनासापुटेन च पूरयेत
पवनं मंत्री मूलमष्टमितं जपन् अंगुष्ठेन दक्षनासां धृ
त्वा कुम्भकयोगतः जपेद्द्वात्रिंशतावृत्त्या ततो दक्षिण
नासया शनैः शनैस्त्यजेद्वायुं जपन् षोडशधा मनुम्
वामनासापुटेऽप्येवं पूरकुम्भकरेचकम् ॥ पुनर्दक्षि
णतः कुर्य्यात् पूर्ववत् सुरपूजिते प्राणायामविधिः प्रो
क्तो ब्रह्ममंत्रस्य साधने ततो ध्यानं प्रकुर्वीत साधकाभी
ष्टसाधनम् हृदयकमलमध्ये निर्विशेषं निरीहं हरि
हरविधिवेद्यं योगिभिर्ध्यानगम्यम् जननमरणभीति
भ्रंशि सच्चित्स्वरूपं सकलभुवनबीजं ब्रह्म चैतन्यमी
डे ध्यात्वैवं परमं ब्रह्म मानसैरुपचारकैः परमं ब्रह्म
मानसैरुपचारकैः पूजयेत् परया भक्त्या ब्रह्मसायु
ज्यहेतवे गन्धं दद्यान्महीतत्त्वं पुष्पमाकाशमेव च
धूपं दद्याद्वायुतत्त्वं दीपं तेजः समर्पयेत् नैवेद्यं तोय
तत्त्वेन प्रदद्यात् परमात्मने ततो जप्त्वा महामंत्रं मन
सा साधकोत्तमः समर्प्य ब्रह्मणे पश्चाद्बहिः पूजां समा
रभेत् उपस्थितानि द्रव्याणि गन्धपुष्पादिकानि च व
स्त्रालंकरणादीनि भक्ष्यपेयानि यानि च मंत्रेणानेन
संशोध्य ध्यात्वा ब्रह्म सनातनम् निमील्य नेत्रे मतिमा

नर्पयेत्परमात्मने ब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौ
ब्रह्मणाहुतम् ब्रह्मैवतेनगन्तव्यंब्रह्मकर्मसमा
धिना ततोनैवेद्यमनुज्ञाप्यजप्त्वामूलंस्वशक्तितः त
त्समर्प्यब्रह्मसात्कृत्वास्तोत्रंचकवचंपठेत् स्तोत्रंशृणु
महेशानिब्रह्मणःपरमात्मनः यत्श्रुत्वासाधकोदे
विब्रह्मसायुज्यमश्नुते ॐनमस्तेसतेसर्वलोकाश्र
यायनमस्तेचितेविश्वरूपात्मकायनमोऽद्वैततत्वा
यमुक्तिप्रदाय नमोब्रह्मणेव्यापिनेनिर्गुणाय त्वमे
कंशरण्यंत्वमेकंवरेण्यंत्वमेकंजगत् कारणंविश्व
रूपम् त्वमेकंजगत्कर्तृपातृप्रहर्तृत्वमेकंपरंनि
श्चलंनिर्विकल्पम् भयानांभयंभीषणंभीषणानांग
तिःप्राणिनांपावनंपावनानाम् महोच्चैःपदानांनि
यन्तृत्वमेकंपरेषांपरंरक्षकंरक्षकाणाम् परेशप्र
भोसर्वरूपाविनाशिन्ननिर्देश्यसर्वेन्द्रियागम्य
सत्य अचिन्त्याक्षरव्यापकाव्यक्ततत्वजगद्भासका
धीशपायादपायात् तदेकंस्मरामस्तदेकंजपामस्त
देकंजगत् साक्षिरूपंनमामः सदेकंनिधानंनि
रालम्बमीशंभवाम्भोधिपोतंशरण्यंव्रजामः ॥
पंचरत्नमिदंस्तोत्रंब्रह्मणःपरमात्मनः यःपठेत्प्र
यतोभूत्वाब्रह्मसायुज्यमाप्नुयात् प्रदोषेऽदःपठेन्नि
त्यंसोमवारेविशेषतः श्रावयेद्बोधयेत्प्राज्ञोब्रह्म
निष्ठान्स्वबान्धवान् इतितेकथितंदेविपंचरत्नंमहे

म· नि· तं· ५

9

षितः कवचं शृणु पार्वति जगन्मंगलनामकं पठना
द्धारणाद्यस्य ब्रह्मज्ञो जायते ध्रुवं परमात्मा शिरः पा
तु हृदयं परमेश्वरः कंठं पातु जगत्पाता वदनं सर्व
दृग्विभुः करौ मे पातु विश्वात्मा पादौ रक्षतु चिन्मयः
सर्वांगं सर्वदा पातु परं ब्रह्म सनातनम् श्रीजगन्मंग
लस्यास्य कवचस्य सदाशिवः ऋषिश्छन्दोनुष्टुबिति
परमब्रह्म देवता चतुर्वर्गफलावाप्त्यै विनियोगः
प्रकीर्तितः यः पठेद्ब्रह्मकवचं ऋषिन्यासपुरःसरम्
स ब्रह्मज्ञानमासाद्य साक्षाद्ब्रह्ममयो भवेत् भूर्जे वि
लिख्य गुटिकां स्वर्णस्थां धारयेद्यदि कंठे वा दक्षिणे वा
हौ सर्वसिद्धीश्वरो भवेत् इत्येतत्परमब्रह्मकवचं ते
प्रकाशितम् दद्यात्प्रियाय शिष्याय गुरुभक्ताय धी
मते पठित्वा स्तोत्रकवचं प्रणमेत्साधकाग्रणीः ओं
नमस्ते परमब्रह्म नमस्ते परमात्मने निर्गुणाय नम
स्तुभ्यं सद्रूपाय नमो नमः वाचिकं कायिकं वापि मान
सं वा यथामति आराधनं परेशस्य भावशुद्धिर्विधीय
ते एवं संपूज्य मतिमान् स्वजनैर्बान्धवैः सह महाप्र
सादं स्वीकुर्याद्ब्रह्मणः परमात्मनः पूजने परमेशस्य
नावाहनविसर्जने सर्वत्र सर्वकालेषु साधयेद्ब्रह्म
साधनम् अस्नातो वा कृतस्नानो भुक्तो वापि बुभुक्षितः
पूजयेत्परमात्मानं सदा निर्मलमानसः अनेन ब्रह्ममंत्रेण
भक्ष्यपेयादिकं च यत् दीयते परमेशाय तदेव पावनं महत्

गंगातोये शिलादौ च स्पृष्टदोषोऽपि वर्ज्जते परब्रह्मा
र्पिते द्रव्ये स्पृष्टास्पृष्टं न विद्यते पक्वं वापि न पक्वं वा
मंत्रेणानेन मंत्रितम् साधको ब्रह्मसात्कृत्वा भुंजीया
त् स्वजनैः सह नात्र वर्णविचारोऽस्ति नोच्छिष्टादिवि
वेचनम् न कालनियमोऽप्यत्र शौचाशौचं न चैव च यथा
काले यथा देशे यथा योगेन लभ्यते ब्रह्मसात्कृतं तेनैव
यमश्नीयाद विचारयन् भ्रांतो नैव पचेनापि श्वमुखा
दपि निःसृतम् तदन्नं पावनं दैवैर्विदेवानामपि दुर्लभं
पुनर्म्मनुजादीनां वक्तव्यं देववल्लिते महापातकयु
क्तो वा युक्तो वाप्युपपातकैः सकृत्प्रसादग्रहणान्मु
च्यते नात्र संशयः परमेशस्य नैवेद्यमेव नाद्य तत्फले
भवेत् सार्द्धत्रिकोटितीर्थेषु स्नानदानेन यत्फलम्
तत्फलं लभते मर्त्यो ब्रह्मार्पितनिषेवणात् अश्वमे
धादिभिर्यज्ञैरिष्ट्वा यत्फलमश्नुते भक्तितो ब्रह्मनैवेद्य
तस्मात्कोटिगुणं लभेत् जिह्वाकोटिसहस्रैस्तु वक्त्र
कोटिशतैरपि महाप्रसादमाहात्म्यं वर्णितुं नैव शक्य
ते यत्र कुत्र स्थितो वापि प्राप्य ब्रह्मार्पितामृतम् गृही
त्वा कीकटो वापि ब्रह्मसायुज्यमाप्नुयात् यदि स्याद्वीच
जातीयमन्नं ब्रह्माणि भावितम् तदन्नं ब्राह्मणैर्ग्रास
मपि वेदांतपारगैः जातिभेदो न कर्तव्यः प्रसादे पर
मात्मनः योऽशुद्धबुद्धिं कुरुते स महापातकी भवेत्
वरं पापशतं कुर्याद्दूरं विप्रवधं प्रिये परब्रह्मार्पिते

म·
नि· तं·
३·
१०

स्नेहेन कुर्यादवहेलनं येत्यजंतिनरामूढामहामंत्रेण
संस्कृतम् अन्नंतोयादिकंभद्रे पितॄंस्तेपातयंत्यधः स्व
यमप्यंधतामिस्रेपतंत्याभूतसंप्लवम् ब्रह्मसात्कृत
नैवेद्यद्वेष्टृणांनास्तिनिष्कृतिः शृण्वाद्येतेक्रियाःसर्वाः
सशुभिस्तुकृतायते स्वेच्छाचारोऽत्रविहितोमहामंत्रस्य
साधने किंतस्यवैदिकाचारैस्तांत्रिकैर्वापितस्यकिं ब्र
ह्मनिष्ठस्यविदुषःस्वेच्छाचारोविधिःस्मृतः कृतेनास्यफ
लंनास्तिनाकृतेनापिकिल्बिषं नविघ्नःप्रत्यवायोऽस्यब्र
ह्ममंत्रस्यसाधनात् तस्मिन्धर्म्मेमहेशानिस्यात्सत्यवादी
जितेन्द्रियः परोपकारनिरतोनिर्विकारःसदाशयः मा
त्सर्य्यहीनोऽदम्भीचदयावान्शुद्धमानसः मातापि
त्रोःप्रीतिकारीतयोःसेवनतत्परः ब्रह्मश्रोताब्रह्मम
ताब्रह्मान्वेषणमानसः यतात्मादृढबुद्धिःस्यात्साक्षा
द्ब्रह्मेतिभावयन् नमिथ्याभाषणंकुर्य्यान्नपरानिष्टचि
न्तनम् परस्त्रीगमनंचैवब्रह्ममंत्रीविवर्ज्जयेत् तत्स
दितिवदेद्देविप्रारम्भेसर्वकर्म्मणाम् ब्रह्मार्पणमस्त्व
वाक्यंपानभोजनकर्म्मणोः येनोपायेनमर्त्यानांलो
कयात्राप्रसिद्ध्यति तदेवकार्य्यंब्रह्मज्ञैरिदंधर्म्मंसना
तनम् ॥ अथसंध्याविधिंवक्ष्येब्रह्ममंत्रस्य
शाम्भवि यांकृत्वाब्रह्मसम्पत्तिंलभंतेभुविमान
वाः प्रातर्म्मध्याह्नसायाह्नेयथादेशंयथासने

पूर्ववत् परमब्रह्म ध्यात्वा साधकसत्तमः। अष्टोत्तरश
तं देवि गायत्रीजपमाचरेत्। जपं समर्प्य विधिवत् पू
र्ववत् प्रणमेत् सुधीः। एषा संध्या मया प्रोक्ता सर्वेषां
ब्रह्मसाधने यदनुष्ठानतो मन्त्री शुद्धान्तःकरणो भवेत्
गायत्रीं शृणु वामोरु सर्वपापप्रणाशिनीम्। परमेश्व
राय शब्दान्ते विद्महे तदनन्तरं परतत्त्वाय पदतो धीमहीति
वदेत् प्रिये। तदनन्तरमीशानि तन्नो ब्रह्म प्रचोदयात्
इयं श्रीब्रह्मगायत्री चतुर्वर्गप्रदायिनी। पूजने यजने
चैव स्नाने पाने च भोजने। यद्यत्कर्म प्रकुर्वीत ब्र
ह्ममन्त्रेण साधयेत्। ब्राह्मे मुहूर्ते चोत्थाय प्रणम्य ब्रह्म
देवं गुरुम्। ध्यात्वा च परमं ब्रह्म यथाशक्ति मनुं स्मरेत्
पूर्ववत् प्रणमेद् ब्रह्म प्रातःकृत्यमिदं स्मृतम्। द्वात्रिं
शता सहस्रेण जपेनास्य पुरस्क्रिया। तद्दशांशेन ह
वनं तर्पणं तद्दशांशतः। सेचनं तद्दशांशेन तद्दशांशे
न सुन्दरि ब्राह्मणान् भोजयेन्मन्त्री पुरश्चरणकर्मणि
भक्ष्याभक्ष्यविचारोऽत्र त्याज्यग्राह्यं न विद्यते। न कालशुद्धि
नियमो न वा स्थाननिरूपणम्। अभुक्तो वापि भुक्तो वा
स्नातो वास्नात एव वा। साधयेत् परमं मन्त्रं स्वेच्छाचारे
ण साधकः। विनायासैर्विनाक्लेशैः स्तोत्रं च कवचं विना
विनान्यासैर्विना मुद्रां विना मन्त्रवरानने विना वीरगणे
शादि जपं च कुल्लुकां विना। अकस्मात् परमब्रह्मसाध
नकारी भवेद् ध्रुवम्। संकल्पोऽस्मिन् महामन्त्रे मानसः

म·
नि· तं·
२·
११

परिकीर्त्तितः साधने ब्रह्ममंत्रस्य भावशुद्धिर्विधीयते स
र्वं ब्रह्ममयं देवि भावयेद् ब्रह्मसाधकः न वास्य प्रत्यवा
योऽस्ति नांगवैगुण्यमेव च महामनोः साधने त्वंयोगं सं
गायते ध्रुवम् कलौ पापयुगे घोरे तपोहीनेऽतिदुस्तरे नि
स्तारबीजमेतावत् ब्रह्ममंत्रस्य साधनम् साधनानि बहू
कानि नानातंत्रागमादिषु कलौ दुर्बलजीवानामसाध्या
नि महेश्वरि अल्पायुषः स्वल्पसत्त्वा अन्नाधीनासवः प्रिये
लुब्धा धनार्जने व्यग्राः सदा चंचलमानसाः समाधावस्थि
रधियो योगक्लेशासहिष्णवः तेषां हिताय मोक्षाय ब्रह्ममा
र्गोऽयमीरितः कलौ नास्त्येव नास्त्येव सत्यं सत्यं मयोच्यते
ब्रह्मदीक्षां विना देवि कैवल्याय सुखाय च प्रातःकृत्यं प्रात
रेव संध्यां कुर्यात् त्रिकालतः मध्याह्ने पूजने कुर्यात् सर्वतं
त्रेष्वयं विधिः परब्रह्मोपासनेन साधकस्य विधिः शिवे
विधयः किंकरा यत्र निषेधाः प्रभवोऽपि न स्वेच्छाचारेणेष्ट
सिद्धिस्तद्विना कोऽन्यमाश्रयेत् ब्रह्मज्ञानिगुरुं प्राप्य शांतं
निश्चलमानसम् धृत्वा तच्चरणाम्भोजं प्रार्थयेद् भक्तिभा
वतः करुणामय दीनेश तवाहं शरणागतः त्वत्पदाम्भो
रुहच्छायां देहि मूर्ध्नि यशोधन इति प्रार्थ्य गुरुं प्रज्ञा
न् पूजयित्वा स्वशक्तितः कृतांजलिपुटो भूत्वा तूष्णीं
तिष्ठेद्गुरोः पुरः गुरुर्विचार्य विधिवद्यथोक्त
शिष्यलक्षणाम् आहूय कृपया दद्यात् सच्छिष्या
य महामनुम् ॥

उपविश्य समनेत्रानीशोमुखो वाप्युदङ्मुखः स्ववामे शि
ष्यमानीय करुणेनावलोकयेत् ततः शिष्यस्य शिरसि
ऋषिन्यासपुरःसरं जपेदष्टशतं मंत्रं साधकेष्टसिद्ध
ये दक्षकर्णे ब्राह्मणानामितरेषां च वामतः समधाश्रा
वयेत् मंत्रं सद्गुरुः करुणानिधिः उपदेशविधिः प्रो
क्तो ब्रह्ममंत्रस्य कालिके नात्र पूजाद्यपेक्षास्ति संकल्प
मानसेवरेत् ततः श्रीगुरुपादाब्जे दण्डवत्पतितं शि
ष्यम् उत्थापयेदब्रुतिते शिष्यः स्नेहादिमं मंत्रमुदी
रयन् उत्तिष्ठ वत्स मुक्तोऽसि ब्रह्मज्ञानपरो भव जि
तेन्द्रियः सत्यवादी बलारोग्यं सदास्तु ते ततउत्थाय श
रेवयथाशक्त्यनुसारतः दक्षिणां स्वफलं वापि दद्यात्
साधकसत्तमः गुरोराज्ञावशीभूय विहरेद्देववद्भुवि मंत्र
ग्रहणमात्रेण तदात्मा तन्मयो भवेत् ब्रह्मभूतस्य देवे
शि किमसैव ह साधनैः इति सत्ते पतो ब्रह्मदीक्षा तेक
थिता प्रिये गुरुकारुण्यमात्रेण ब्रह्मदीक्षां समाचरेत्
शाक्ताः शैवा वैष्णवाश्च सौरा गाणपतास्तथा विप्रावि
प्रेतराश्चैव सर्वेऽप्यत्राधिकारिणः अहं मृत्युंजयो देवि
देवदेवो जगद्गुरुः स्वेच्छाचारी निर्विकल्पो मंत्रस्यास्य
प्रसादतः अमुमेव ब्रह्ममंत्रमतः पूर्वमुपासिताः ब्र
ह्मा ब्रह्मर्षयश्चापि देवा देवर्षयस्तथा देवर्षिवर्गाश्च
नयलभ्यो राजर्षयः प्रिये उपासिता ब्रह्मभूताः परमा
त्मप्रसादतः ब्राह्मणेनो महेशानि विचारो नास्ति कुत्रचि

न स्वीयमंत्रं गुरुः कुर्यात् शिष्येभ्योऽपि विचारयन् पिता
पिदीक्षयेत पुत्राम् भ्राता भ्रात्रेन् पतिः स्त्रियम् मातुलो
भागिनेयांश्च नप्तॄन्मातामहोऽपि च स्वमंत्रदाने यो दो
षस्तथापि सिद्धदीक्षया सिद्धे ब्रह्ममहामंत्रे न दोषो नैव
विद्यते ब्रह्मज्ञानिमुखात्कृत्वा येन केन विधानतः ब्रह्मभृ
तो नरः पूतः पुण्यपापैर्न लिप्यते ब्रह्ममंत्रोपासिता ये गृ
हस्था ब्राह्मणादयः स्वस्ववर्णोत्तमोत्तमाः पूज्या मान्या विशे
षतः ब्राह्मणा यतयः साक्षादितरे ब्राह्मणैः समाः तस्मा
त्सर्वैः प्रयत्नेषु ब्रह्मज्ञान् ब्रह्मदीक्षितान् ये वै तानवम
न्यन्ते ते नरा ब्रह्मघातिनः पतन्ति घोरनरके यावच्चन्द्रदिवा
करौ कम् यत्पापं स्त्रीवधे प्रोक्तं यत्पापं भ्रूणघात
ने तस्मात्कोटिगुणं पापं ब्रह्मोपासकनिन्दनात् य
था ब्रह्मोपदेशेन विमुक्तः सर्वपातकैः गच्छति ब्रह्म
सायुज्यं तथैव तत्त्वसाधनात् इति श्रीमहानिर्वाणतंत्रे
सर्वतंत्रोत्तमोत्तमे सर्वधर्मनिर्णयसारे श्रीमदाद्या
सदाशिवसंवादे जीवनिस्तारोपायप्रश्ने परब्रह्मो
पदेशकथनं नाम तृतीयोल्लासः ॥ श्रीदेव्युवाच ॥
श्रुत्वा सम्यक्परब्रह्मोपासने परमेश्वरी परमानन्दस
म्पन्ना शंकरं परिपृच्छति ॥ श्रीदेव्युवाच कथितं य
त्त्वया नाथ ब्रह्मोपासनमुत्तमम् सर्वलोकप्रियकरं
साक्षाद्ब्रह्मपदप्रदम् तेजोवृद्धिबलैश्वर्यदाय
कं सत्वसाधनम् ॥

२९ त्रिषेवणात् ॥ गङ्गातिब्रह्म°

स्मात्त्वज्जगदीशान तव वाक्यामृतन्तत्श्रुत्वा यदुक्तंकरु
णासिन्धोयथाब्रह्मसायुज्यंतथैवममसाधनात् यत्
हेदितुमिच्छामिमहीयसाधनेपरम् ब्रह्मसायुज्यजननं
यत्त्वयाकथितंप्रभो विधानेकीदृशंतस्यसाधनेकेन
वर्त्मना मंत्रःकोवात्रविहितोध्यानपूजादिकंचकिं स
विशेषेणाविशेषेणमामूलाद्वक्तुमर्हसि ममप्रीतिकरंदे
वलोकानांहितकारकम् कोन्यमत्त्वामृतेशम्भोमेव्या
धिभिषग्गुरुः इतिदेव्यावचःश्रुत्वादेवदेवीमहेश्वरः
उवाचपरयाप्रीत्यापार्वतीपार्वतीपतिः श्रीसदाशिवउवा
च शृणुदेविमहाभागेतवाराधनकारणं तवसाधनतो
येनब्रह्मसायुज्यमश्नुते त्वंपराप्रकृतिःसाक्षाद्ब्रह्मणः
परमात्मनः त्वत्तोजातंजगत्सर्वंत्वंजगज्जननीशिवे
महदाद्यणुपर्य्यंतंयदेतत्सचराचरम् त्वयैवोत्पादितं
भद्रेत्वदधीनमिदंजगत् त्वमाद्यासर्वविद्यानामस्माक
मपिजन्मभूः त्वंजानासिजगत्सर्वंनत्वांजानातिकश्च
न त्वंकालीतारिणीदुर्गाषोडशीभुवनेश्वरी धूमावती
त्वंबगलाभैरवीछिन्नमस्तका त्वमन्नपूर्णावाग्देवीत्वंदे
वीकमलालया सर्वशक्तिस्वरूपात्वंसर्वदेवमयीतनुः
त्वमेवसूक्ष्मास्थूलात्वंव्यक्ताव्यक्तस्वरूपिणी निराकारा
पिसाकाराकस्त्वांवेदितुमर्हति उपासकानांकार्यार्थंश्रे
यसेजगतामपि दानवानांविनाशायधत्सेनानाविधा
स्तनूः चतुर्भुजात्वंद्विभुजाषड्भुजाष्टभुजातथा त्वमेव

विश्वरत्नार्थनानाशस्त्रास्त्रधारिणी तत्तद्रूपविभेदेन
मंत्रयंत्रादिसाधनम् कथितंसर्वतंत्रेषुभावाश्चकथिता
स्त्रयः पशुभावः कलौनास्तिदिव्यभावोऽपिदुर्लभः वी
रसाधनकर्म्माणिप्रत्यक्षाणिकलौयुगे कुलाचारंविना
देविकलौसिद्धिर्नजायते तस्मात्सर्वप्रयत्नेनसाधये
त्कुलसाधनम् कुलाचारेणदेवेशिब्रह्मज्ञानंप्रजाय
ते ब्रह्मज्ञानयुतोमर्त्योजीवन्मुक्तोनसंशयः ज्ञानेनमे
ध्यमखिलममेध्यंज्ञानतोभवेत् ब्रह्मज्ञानेसमुत्पन्ने
मेध्यामेध्यंनविद्यते योजानातिपरंब्रह्मसर्वव्यापिसना
तनम् किमस्यमेध्यंतस्यात्रसर्वंब्रह्मेतिजानतः त्वंस
र्वरूपिणीदेवीसर्वेषांजननीपरा तुष्टायांत्वयिदेवेशि
सर्वेषांतोषणंभवेत् सृष्टेरादौत्वमेकासीत्तमोरूपम
गोचरम् त्वत्तोजातंजगत्सर्वंपरब्रह्मसिसृक्षया महत्
तत्त्वादिभूतांतंत्वयासृष्टमिदंजगत् निमित्तमात्रंतद्ब्र
ह्मसर्वकारणकारणम् सद्रूपंसर्वतोव्यापिसर्वमावृत्य
तिष्ठति सदैकरूपंचिन्मात्रंनिर्लिप्तंसर्ववस्तुषु नक
रोतिनचाश्नातिनगच्छतिनतिष्ठति सत्यंज्ञानमनाद्यं
तमवाङ्मनसगोचरम् तस्येच्छामात्रमालम्ब्यत्वंमहा
योगिनीपरा करोषिपासिहंस्यंतेजगदेतच्चराचरम् त
वरूपंमहाकालोजगत्संहारकारकः महासंहारसम
येकालः सर्वंग्रसिष्यति कलनात्सर्वभूतानांमहाका
लःप्रकीर्तितः महाकालस्यकलनात्त्वमाद्याकालिका

परा कालसंग्रसनात्काली सर्वेषामादिरूपिणी
कालत्वादादिभूतत्वादाद्या कालीति गीयते पुनः स्व
रूपमास्थाय तमोरूपं निराकृतिः वाचातीतं मनोगम्य
त्वमेकैवावशिष्यसे साकाररूपिनिराकारा मायया बहुरू
पिणी त्वं सर्वादिरनादिस्त्वं कर्त्री हर्त्री च पालिका अत्र ले
कथितं महे ब्रह्ममंत्रेण दीक्षितः यत्फलं समवाप्नोति
तच्चैव तव साधनात् नानाचारेण भावेन देशकाला
धिकारिणाम् विभेदात् कथितं देवि क्वचिद् गुप्तसाध
नम् ये युष्माधिकृता मर्त्यास्ते तत्र फलभागिनः भविष्य
ति तरिष्यन्ति मानुषा गतकिल्विषाः बहुजन्मार्जितैः
पुण्यैः कुलाचारमतिर्भवेत् कुलाचारेण पूतात्मा सा
क्षाच्छिवमयो भवेत् यत्रास्ति भोगबाहुल्यं तत्र योगस्य का
कथा योगेऽपि भोगविरहः कौलस्तूभयमश्नुते एक
श्चेत् कुलतत्त्वज्ञः पूजितो येन सुव्रते सर्वे देवाश्च देव्य
श्च पूजिता नात्र संशयः पृथ्वीं हेमसंपूर्णां दत्वा यत्
फलमाप्नुयात् तस्मात्कोटिगुणं पुण्यं लभते कौलि
कार्चनात् श्वपचोऽपि कुलज्ञानी ब्राह्मणादतिरिच्यते
कुलाचारविहीनस्तु ब्राह्मणः श्वपचाधमः कौलधर्मा
त् परो धर्मो नास्ति ज्ञाने तु मामके यस्यानुष्ठानमात्रेण
ब्रह्मज्ञानी नरो भवेत् सत्यं ब्रवीमि ते देवि हृदि कृत्वाव
धारय सर्वधर्मान्नमात् कौलात् परो धर्मो न विद्यते अ
यं तु परमो मार्गो गुप्तोऽस्ति पशुसंकटे व्यक्तो भविष्य

म·
नि·तं·
१४

14

त्वविनान्संहृतेप्रवलेकलौ कलिकालेप्रहृष्टेतुसर्वसंस
त्संमयोच्यते नस्यास्यतिविनाकौलान्पशवोमानवाभु
वि यदातुवैदिकीदीक्षादीक्षापौराणिकीतथा नस्यास्य
तिवरारोहेतदैवप्रवलःकलिः यदातुपुण्यपापानांप
रीक्षावेदसम्भवा नस्यास्यतिशिवेशांतेतदैवप्रवलःक
लिःक्वचिच्छिन्नाक्वचिद्भिन्नायदास्युरतरंगिणी भविष्यति
कुलेशानितदैवप्रवलःकलिः यदातुम्लेच्छजातीयारा
जानोधनलोलुपाः भविष्यंतिमहाप्राज्ञेतदैवप्रवलः
कलिः यदास्त्रियोऽतिदुर्दान्ताःकर्कशाःकलहेरताः गर्हि
ष्यंतिचभर्तारंतदैवप्रवलःकलिः यदातुमानवाभूमौ
स्त्रीजिताःकामकिंकराः द्रुह्यंतिगुरुमित्रादीन्तदैवप्र
वलःकलिः यदाक्षोणीस्वल्पफलाःतोयदाःस्तोकवर्षि
णः असम्यक्फलिनोवृक्षास्तदैवप्रवलःकलिः भ्रातरः
स्वजनामात्यायदाधनकणेहयामिथः संप्रहरिष्यंति
तदैवप्रवलःकलिः प्रकटेमद्यमांसादौनिन्दादण्डवि
वर्जिते गूढपानंचरिष्यंतितदैवप्रवलःकलिः सत्येत्रे
ताद्वापरेषुयथामद्यादिसेवनम् कलावपितथाकुर्यात
कुलधर्मानुसारतः येकुर्वंतिकुलाचारंसत्यपूताजिते
न्द्रियाः ब्रह्मकावादयाशीलानहितान्वाधतेकलिः गु
रुशुश्रूषणेयुक्ताभक्ताःमात्पदाम्बुजे अनुरक्ताःस्वदारे
षुनहितान्वाधतेकलिः सत्यव्रताःसत्यनिष्ठाःसत्यध
र्मपरायणाः कुलसाधनसत्यायेनहितान्वाधतेकलिः

कुलमार्गेणानन्वानिष्ठोपितानिचयोगिने येद्वषुःसम
वचसेनहितान्वाधतेकलिः हिंसामानसर्प्परहिताद
म्भद्वेषविवर्जिताः कुलधर्मेषुनिष्ठायेनहितान्वाध
तेकलिः कौलिकैःसहसंसर्गंवसतिकुलसाधुषु कुर्व
तिकौलसेवांयेनहितान्वाधतेकलिः नानावेशधराःकौ
लाःकुलाचारेषु निष्ठलाः सर्वेनैताकुलाचारैर्नहितान्
वाधतेकलिः स्नानंदानंतर्पणंतीर्थव्रतंतर्पणमेवचयेकु
र्वतिकुलाचारैर्नहितान्वाधतेकलिः जीवसेकादिसं
स्काराःपितृश्राद्धादिकाःक्रियाः येकुर्वतिकुलाचारैर्न
हितान्वाधतेकलिः कुलतत्त्वंकुलद्रव्यंकुलयोगिन
मेवच नमस्कुर्वतियेभक्त्यानहितान्वाधतेकलिः कौ
टिल्यानृतहीनानांस्वच्छानांकुलमार्गिणाम् परोपका
रव्रतिनांसाधूनांकिंकरःकलिः कलेर्दोषसमूहस्यम
हानेकोगुणःप्रिये समस्तप्रतिस्तकौलानामाश्रयःसकल्प
मात्रतः अपरेतुयुगेदेवि तपःपापंचमानसम् त्वणा
मासीत्कलौतुपापंकेवलंतत्तुदुष्कृतम् कुलाचारैर्वि
हीनायेसततासत्यभाषिणः परद्रोहपरायचतेनराः
कलिकिंकराः कुलवर्त्मस्वभक्तायेपरयोषितस्कामु
काः द्वेष्टारःकुलनिष्ठानांतेज्ञेयाःकलिकिंकराः युगा
चारप्रसंगेनकलेःप्राबल्यलक्षणम् संक्षेपात्कथितंम
हेशानियेनतवप्रार्थिति प्रकटेऽत्रकलौदेविसर्वेधर्माश्च
दुर्बलाः स्थास्यत्येकंसत्यमात्रंतस्मात्सत्यमयोभवेत् स

म॰ नि॰ तं॰ १५

15

सत्यधर्म्मं समाश्रित्य यत् कर्म्म कुरुते नरः तदेव सफलं
कर्म्म सत्यं जानीहि सुव्रते न हि सत्यात् परो धर्म्मो न पाप
मनृतात् परम् तस्मात् सर्व्वात्मना मर्त्यः सत्यमेकं समा
श्रयेत् सत्यहीना वृथा पूजा सत्यहीनो वृथा जपः सत्य
हीनं तपो व्यर्थं मुषरे वपनं यथा सत्यरूपं परं ब्रह्म सत्यं
हि परमं तपः सत्यमूलाः क्रियाः सर्व्वाः सत्यात् परतरो
न हि अत एव मया प्रोक्तं कृते प्रवले कलौ कुलाचारो
ऽपि सत्येन कर्त्तव्यो व्यक्तभावतः गोपनाद्दीयते सत्यं न गु
प्तिरनृतं विना तस्मात् प्रकाशतः कुर्य्यात् कौलिकः कु
लसाधनम् कुलधर्म्मस्य गुप्त्यर्थं नानृतं स्याज्जुगुप्सितं
यदुक्तं कुलतन्त्रेषु न शस्तं प्रवले कलौ कृते धर्म्मश्चतु
ष्पादः त्रेतायां पादहीनकः द्विपादो द्वापरे देवि पादमा
त्रः कलौ युगे तथापि सत्यं बलवत् तपः एवं दयापि च
सत्यपादे हृते लोके धर्म्मलोपः प्रजायते तस्मात् सत्यं
समाश्रित्य सर्व्वकर्म्माणि साधयेत् कुलाचारं विनात्र
नान्योपायः कुलेश्वरि ॥ तत्रादौ तत्प्रवेशार्थं कृते नैः
श्रेयसं भवेत् सर्व्वेषां सत्यपूतात्मा मन्त्रविदि नवकर्म्मना
सर्व्वकर्म्म नरः कुर्य्यात् स्वस्ववर्णाश्रमोदितम् दीक्षां पू
जाजपहोमं पुरश्चरणतर्पणम् व्रतोद्वाहौ पुंसवनं सी
मन्तोन्नयनं तथा जातकर्म्म तथा नाम चूडाकरणमेव च
मृतक्रियां पितृश्राद्धं कुर्य्यादागमसम्मतम् तीर्थश्राद्धं वृ
षोत्सर्गं शारदोत्सवमेव च यात्रां गृहप्रवेशं च नवव

स्नादिधारणम् वापीकूपतडागानां संस्कारं निषिक
मेव गृहारम्भप्रतिष्ठां च देवानां स्थापने तथा दिवा
कृतं निशाकृतं सर्वं कृतं तथैव च अन्त्यमासं वर्षकृ
तं नित्यं नैमित्तिकं च यत् कर्त्तव्यं यदकर्त्तव्यं मासे या
स्यं च यद्भवेत् मयोक्तेन विधानेन तत्सर्वं साधयेन्न
रः नकुर्याद्यदि मोहेन तत्कर्म्मा माश्च दुःखापि वा विन
ष्टः सर्वकर्म्मभ्यो विघ्नायो भवेत्कृमिः यदि मन्मत
मुत्सृज्य महेशि प्रबले कलौ यदायत् क्रियते कर्म्म
विपरीताय तद्भवेत् मन्त्राणां यन्त्रादीनां साधकत्वा
णयातिनी पूजापि विफला देवि हते भस्मार्पणं यथा
देवता कुपिता तस्य विघ्नं तस्य पदे पदे कलिकाले प्र
हृष्टे तन्त्राणाम् उक्तानाम् अविवेके योऽन्यमार्गैः क्रियां कु
र्यात्स महापातकी भवेत् ब्रह्मा हाहा प्रकुर्वाणाः
योऽन्यमार्गेण मानवः सयाति नरकं घोरं यावच्चन्द्र
दिवाकरौ वनेत्र लवधः प्रोक्तः ब्राह्मणो मानवको भवे
त् केवलं सूत्रवाह्योऽसौ चाण्डालादधमोऽपि सः उद्धा
हितापि या नारी जानीयात्सा तु गर्हिता उद्धारापि भ
वेत्पापी संसर्गात्कुलनायिके वेश्यागमनजं पाप
तस्य पुंसो दिने दिने तद्बलाद्व्रतीयादि नैव गृह्णन्ति
देवताः पितरोऽपि न चाश्नन्ति यत्तत्तन्मल एव वत्त
घोरं घोरकं नीतः सर्वधर्म्मबहिष्कृतः देवपित्रे कुला
चारे नाधिकारोऽस्य जायते प्रशाम्भवेन मार्गेण देव

स्थापनंचरेत् तस्मान्निर्थ्यंभवेत्तत्रदेवतायाःकथंवत
इहामुत्रफलेनास्तिकायक्लेशोधनत्ययः आगमोक्तवि
धिंहित्वायःश्राद्धंकुरुतेनरः श्राद्धंनहिफलंतस्योऽपिपितृ
भिर्नरकंव्रजेत् तत्रोयंशोणितसमंपिण्डंमलमयोभवे
त् तस्मात्सर्वःप्रयत्नेनशांकरंमतमाश्रयेत् वहुनात्र
किमुक्तेनसत्यंसत्यंमयोच्यते अशाम्भवंकृतेकर्म्मस
र्वदैविनिरर्थकम् अस्तुतावत्परोधर्म्मःपूर्व्वधर्म्मोऽ
पिनश्यति शाम्भवाचारहीनस्यनरकान्नैवनिष्कृतिः
मदुदीरितमार्गेणनिमित्तेभिन्नकर्म्मणाम् साधनेय
त्सदृशानितदेवतवसाधनम् विशेषाराधनेतत्रमंत्र
यंत्रादिसंयुतम् भेषजंकलिरोगाणांरूपितांगदतो
मम इतिश्रीमहानिर्वाणतंत्रेसर्वतंत्रोत्तमोत्तमेसर्व
धर्म्मनिर्णयसारेश्रीमदाद्यासदाशिवसंवादेजीवनिस्ता
रोपायप्रश्नेपरप्रकृतिसाधनोपक्रमोनामचतुर्थोल्ला
सः श्रीसदाशिवउवाच त्वमाद्यापरमाशक्तिःसर्वशक्ति
स्वरूपिणी तवशक्त्यावयंशक्ताःसृष्टिस्थितिलयादिषु
तवरूपाणितंत्रानिनानावर्णाकृतीनिच नानाप्रयास
साध्यानिवर्णितुंकेनशक्यते तवकारुण्यलेशेनकुल
तंत्रागमादिषु तेषामर्हासाधनानिकथितानियथाम
ति गुप्तसाधनमेतत्तुनकुत्रापिप्रकाशितम् अस्यप्रसा
दात्कल्याणिमयितेकरुणेदृशी त्वयापृष्टमिदानीत
त्राहंगोपयितुंक्षमः कथयामिइदानीतत्राहंगोपयि,तवप्र

मैमम प्राणाधिकं प्रिये सर्वदुःखप्रशमनं सर्वापद्वि
निवारकम् त्वत्प्राप्तिमूलमविरातवसंतोषकारणम्
कलिकल्मषदीनानां त्राणं स्वल्पायुषां प्रिये बहुप्रया
साशक्तानामेतद्देवपरंधनम् नवात्रमासवाहुल्यं नो
पवासादिसंयमः स्वल्पसाध्यमवाहुल्यं भक्तानां फलदं
महत् तत्रादौ शृणु देवेशि मंत्रोद्धारक्रमं शिवे यस्य श्र
वणमात्रेण जीवन्मुक्तः प्रजायते प्राणेशं तैजसारूढो
भेरुण्डाख्यमविन्दुमान् बीजमेतत्समुद्धृत्य द्वितीयं
समुद्धरेत् प्रिये सन्ध्यारक्तसमारूढा वामनेत्रेन्दुसंयुता
तृतीयं शृणु कल्याणि दीपसंस्थः प्रजापतिः गोविन्दवि
न्दुसंयुक्तः साधकानां सुखावहः बीजत्रयान्ते परमेश्वरि
सम्बोधनपदम् वह्निकान्तावधिः प्रोक्तो दशार्णोऽयम
नुः शिवे सर्वविद्यामयी देवी विद्येयं परमेश्वरि आद्य
त्रयाणां बीजानां प्रत्येकं त्रयमेव वा प्रजपेत्साधकाधी
शः सर्वकामार्थसिद्धये बीजमाद्यत्रयं हित्वा समर्णापि
दशाक्षरी कामवाग्भवताराद्यासमार्णाष्टाक्षरी विद्या
दशार्णमंत्रेण पदात्कालिके पदमुच्चरेत् पुनराद्य
यंबीजं वह्निजायान्ततो वदेत् षोडशीयं समाख्याता स
र्वतंत्रेषु गोपिता वधाद्या प्रणवाद्या चेद्देवासमदशी
हिया नवमंत्रास्समाख्याताः कोटिकोटर्बुदास्तथा सते
पादत्रकथितानां मंत्राणां द्वादश प्रिये येषु येषु च तंत्रेषु
ये ये मंत्राः प्रकीर्तिताः ते सर्वे नवमंत्राः स्युस्त्वमायाप्रक्र

कृतिर्यतः एतेषां सर्व्वेतन्त्रमन्त्राणाम् एकमेव हि साध
नम् कथयामि तव श्रीस्ये तथा लोकहिताय च कुलाचा
रविनोद विशक्तिमन्त्रेण न सिद्धिदः तस्मात्कुलाचाररतः
साधयेच्छक्तिसाधनम् मद्यंमांसंतथामत्स्यंमुद्रामैथुन
मेव च शक्तिपूजाविधावाद्यं पंचतत्त्वंप्रकीर्त्तितम् पंच
तत्त्वंविनापूजाअभिचारायकल्पते नेष्टसिद्धिर्भवेत्तस्य
विघ्नस्तस्य पदेपदे शिलायांशस्यवापेचयथानैवाङ्कु
रोभवेत् पंचतत्त्वविहीनायांपूजायांनफलोद्भवः प्रातः
कृत्यविनादेविनाधिकारीतकर्म्मसु तस्मादादौप्रव
क्ष्यामि प्रातःकृत्यंयथोचितम् रजनीशेषयामस्यशेषा
र्द्धमरुणोदयः तदासाधकउत्थायमुक्तस्वापःकृतासनः
ध्यायेच्छिरसिशुक्लाब्जेद्विनेत्रंद्विभुजंगुरुम् श्वेताम्बर
परीधानंश्वेतमाल्यानुलेपनम् वराभयकरंशांतंक
रुणामयविग्रहम् वामेनोत्पलधारिण्याशक्त्यालि
गितविग्रहम् स्मेराननंसुप्रसन्नंसाधकाभीष्टदायकं
एवंध्यात्वाकुलेशानिमानसैरुपचारकैः पूजयित्वाज
पेत्मंत्रीवाग्भवंबीजमुत्तमम् यथाशक्तिजपंकृत्वा
समर्प्यदक्षिणेकरे ततस्तुप्रणमेद्धीमान्मंत्रेणानेन
सद्गुरुम् भवपाशविनाशायज्ञानदृष्टिप्रदर्शिने न
मः सद्गुरवे तुभ्यं भुक्तिमुक्तिप्रदायिने नराकृतिपर
ब्रह्मरूपायाज्ञानहारिणे कुलधर्म्मप्रकाशायत
स्मै श्रीगुरवे नमः ॥ ॥

प्रणम्यैवं गुरुं तत्र चिन्तयेत्त्रिजदेवताम् पूर्ववत्पूज
यित्वा तां मूलमन्त्रजपं चरेत् यथाशक्ति जपं कृत्वा दे
व्या वामकरे ऽर्पयेत् मन्त्रेणानेन मतिमान् प्रणमेदिष्ट
देवताम् नमः सर्वस्वरूपिण्यै जगद्धात्र्यै नमो नमः आद्या
यै कालिकायै ते कर्त्र्यै हर्त्र्यै नमो नमः नमस्कृत्य वहिर्ग
च्छेद्ग्रामपादद्वयं परम् त्यक्त्वा मूत्रपुरीषं च दन्तधावन
माचरेत् ततो गत्वा जलाभ्यासे स्नानं कृत्वा यथाविधि आ
दावुपस्पृश्य प्रविशेत्सलिले ततः नाभिमात्रजले
स्थित्वा मलानामपनुत्तये सकृत्स्नात्वा तथोन्मज्य मात्र
माचमनं चरेत् आत्मविद्याशिवैस्तत्त्वैः स्वाहान्तैः साधको
त्तमः त्रिः प्राश्य पाथसा द्विरुन्मृज्य वाचमेत् कुलसाधकः कु
लयन्त्रे मन्त्रगर्भं विलिख्य सलिले सुधीः मूलमन्त्रं द्वादश
धा तस्योपरि जपेत् प्रिये तेनाम्बुरूपं जलं ध्यात्वा सूर्य्यमुद्रि
शं पदेशिकः ततो घेत्त्यजलीन्दत्वा तेनैव पाथसा त्रिधा
अभिषिच्य स्वमूर्द्धानं सप्तच्छिद्राणि रोधयेत् ततस्तु देव
ताशीर्षे त्रिर्निमज्य जलान्तरे उत्थाय गात्रं संमार्ज्य परिदध्या
च्छुद्धवाससी तत्तयाभस्मना वापि त्रिपुण्ड्रं बिन्दुसंयुतं
ललाटे तिलकं कुर्य्यात् गण्डयुग्मावधि क्रमात् ततः वैदिकीं तान्त्रि
कीं चैव यथानुक्रमयोगतः सन्ध्यां समाचरेन्मन्त्री तान्त्रिकीं
शृणु कथ्यते आचम्य पूर्ववत्तोये तीर्थान्यावाहयेच्छिवे
गङ्गे च यमुने चैव गोदावरि सरस्वति नर्म्मदे सिन्धु कावे
रि जलेऽस्मिन् सन्निधिं कुरु मन्त्रेणानेन मतिमान् मुद्रया

म:
नि:तं
२९
18

कुशसंज्ञया आवाह्यतीर्थंसलिलेमूलंद्वादशधाजपेत्
ततस्तेनोयतोविन्दुंस्त्रिधाभूमौविनिक्षिपेत् मध्यमा
नामिकायोगात् मूलोच्चारणपूर्वकम् सप्तवारंस्वमूर्द्धा
नमभिषिच्यततोजलम् वामहस्तेसमादायाच्छादयेद्द
क्षपाणिना ईशानवायुवरुणवह्नीन्द्रवीजपंचकम्
त्रिजप्त्वेदथातोयंदक्षहस्तेसमानयेत् वीक्ष्यतेजोमयं
ध्यात्वाचेड्याकृष्यसाधकः देहान्तःकलुषंतेनरेचयेत्
पिंगलाख्यया निक्षिप्यपुरतोवज्रशिलायामस्त्र
मुच्चरन् त्रिवारंताड्येन्मंत्रीहस्तप्रक्षालयेत्ततः आ
चम्याऽर्केणमंत्रेणसूर्यायार्घ्यंनिवेदयेत् तारमायार्क
मइतिस्त्राणिसूर्यंततःपरम् इदमर्घ्यंततस्तस्माद्दद्या
त्स्वाहेत्युदीरयन् ततोध्यायेन्महादेवींगायत्रींपरदे
वताम् प्रातर्मध्याह्नसायाह्ने त्रिरूपांगुणभेदतः प्रात
र्बालींरक्तवर्णांद्विभुजांचकुमारिकाम् कमण्डलुतीर्थ
पूर्णंमच्छमालांचविभ्रतीम् कृष्णाजिनाम्बरधरांहंसा
रूढांसुचिस्मिताम् मध्याह्नेतांश्यामवर्णांवैष्णवींच
तुर्भुजाम् शंखचक्रगदापद्मधारिणींगरुडासनाम् पी
नोन्नतकुचद्वन्द्वांवनमालाविभूषिताम् युवतींसततं
ध्यायेन्मध्येमार्तण्डमण्डले सायाह्नेवरदांदेवींगायत्रीं
संस्मरेद्यतिः शुक्लांशुक्लाम्बरधरांवृषासनकृताश्र
याम् त्रिनेत्रांवरदांपाशंशूलंचनृकरोटिकां विभ्रतीकर
पद्मैश्चवृद्धांगलितयौवनाम् एवंध्यात्वामहादेवींजलानामञ्ज
लित्रयम्॥

दत्वा जपेन्तु गायत्रीं दशधा शतधापि वा गायत्रीं शृणु दे
वेशि वदामि तव भावतः आद्यायै पदमुच्चार्य्य विद्महे त
दनन्तरम् परमेश्वर्य्यै धीमहि तन्नः काली प्रचोदयात् प
श्चात्तव गायत्री महापापप्रणाशिनी त्रिसन्ध्यमेतां प्रज
पन् सन्ध्यायाः फलमाप्नुयात् ततस्तर्पयेद्देवि,
देवर्षिपितृदेवताः प्रणवं संहितीयाद्यां तर्पयामि नमः
पदम् शाक्तेन प्रणवेमाद्यो नमःस्थाने हिठं वदेत् मूलो
ने सर्वभूतानि निवासिन्यै पदं वदेत् सर्वस्वरूपाङे पुको
मायुधापि तथा पठेत् सावरणां सर्वतृप्तीन्तह देवपरा
तपराम् आद्यायै कालिकायै ते इदमर्घ्यं ततो हिठः अने
नार्घ्यं महादेव्यै दत्वा मूलं जपेत्सुधीः यथाशक्तिजपं
कृत्वा देव्या वामकरे र्पयेत् प्रणम्य देवीं पूजार्थं जलमा
दाय साधकः नत्वा तीर्थं पठं स्तोत्रं देवताध्यानतत्परः
यागमण्डपमागत्य पाणिपादौ विशोधयेत् ततो द्वारस्य
पुरतः सामान्यार्घ्यं प्रकल्पयेत् त्रिकोणं तत्र भूबिम्बमण्ड
लं स्वयेत् सुधीः आधारशक्तिं संपूज्य तत्राधारं नियोजये
त् अस्त्रेण पात्रं प्रक्षाल्य हृन्मन्त्रेण प्रपूर्य्य च निक्षिप्य गं
न्धपुष्पं च तीर्थान्यावाहयेत्ततः आधारपात्रतोयेषु वह्नि
र्कशशिमण्डलम् पूजयित्वा तदग्रं धामायावीजेन मन्त्र
येत् प्रदर्शयेद्धेनुयोनी सामान्यार्घ्यमिदं स्मृतम् ततस्त
ज्जलपुष्पेश्च पूजयेद्द्वारदेवताः गणेशं क्षेत्रपालं च वटुकं
योगिनीं तथा गंगां च यमुनां चैव लक्ष्मीं वाणीं ततो यजेत्

म·
हा·नि·
तं·
१९

19

किंचित्स्पृशन् वामशाखां वामपादपुरःसरं स्मरन्
देव्याः पदाम्भोजं मण्डपं प्रविशेत्सुधीः नैऋत्यां दिशि
वास्तीशं ब्रह्माणं च समभ्यर्चयन् सामान्यार्घ्यस्थितोयेन प्रो
क्षयेद्यागमन्दिरम् अनन्तरं साधकेन्द्रो दिव्यदृष्ट्यवलो
कनैः दिव्यानुत्सारयेद्विघ्नान् स्थाण्डिल्यान्तरीक्षगान्
पार्ष्णिघातैस्त्रिभिर्भौमानिति विघ्नांस्त्रिवारयेत् चन्दनागुरु
कस्तूरीकर्पूरैर्यागमण्डपम् धूपयेत्स्वोपवेशार्थं च त
रस्त्रिकोणकम् विलिख्य पूजयेत्तत्र कामरूपाय हन्मनुः
तत्रासने समासीनः प्रथमं कामाधारशक्तितः कमलासना
यनमोमन्त्रेणैवासनं यजेत् उपविश्यासने विद्वान् प्राङ्मु
खो वाप्युदङ्मुखः वटुवीरासनो मन्त्री विजयां परिशोधये
त् तारं मायां समुच्चार्य अमृते अमृतोद्भवे अमृतवर्षिणि
ततोऽमृतमाकर्षय द्विधा सिद्धिं देहि ततो ब्रुयात् कालि
कां मे ततः परम् वशमानय ठद्वन्द्वं संविदाशोधने मनु
मूलमन्त्रं सप्तवारं प्रजप्य विजयां परि आवाहन्यादि मु
द्राश्च धेन्वादीनि प्रदर्शयेत् गुरुं पद्मे सहस्रारे यथासंके
तमुद्रया त्रिधैव तर्पयेद्देवीं हृदि मूलं समुच्चरन् वाग्
भवं वदयुग्मं च वाग्वादिनि पदं ततः मम जिह्वाग्रे स्थि
रीभवे सर्वसत्त्ववशंकरि स्वाहान्तेनैव मन्त्रेणानामह्व यात्
कुण्डलीमुखे स्वीकृत्य संविदां वामकर्णे ह्रीं श्रीगुरुं न
मेत् दक्षिणे च गणेशानं भाले मध्ये सनातनीम् कृतांज
लिपुटो भूत्वा देवीध्यानपरायणः पूजाद्रव्याणि सर्वाणि

दत्तिणेस्थापयेत्सुधीः वामेस्तवासितंनायंकुलद्रव्या
णियानिच अस्त्रेणतमूलमंत्रेणसामामाच्यादिकेनच
सम्प्रोत्त्यसर्वंवस्तूनिवेष्टयेज्जलधारया वह्निवीजेन
देवेशिवह्निःप्राकारमाचरेत् पुष्पचन्दनसंयुक्तमादा
यकरयोर्द्वयोः अस्त्रेणचघर्षयित्वातनप्रत्तिपेत्करस्तु
ड्ये तर्ज्जनीमध्यमाभ्यांचवामपाणितलेशिवे ऊर्द्धोर्द्ध
तालत्रितयंदत्वादिग्वन्धंनततः अस्त्रेणछोटिकाभिस्त
भूतशुद्धिमथाचरेत् अंकेनिधायचकरावुत्तानौसाध
कोत्तमः मनोनिवेश्यमूलेचहूंकारेणचकुण्डलीम् उत्था
प्यहंसमंत्रेणपृथिव्यासहितांतुताम् स्वाधिष्ठानेसमा
नीयतत्वेनतत्वेनियोजयेत् गन्धादिघ्राणसंयुक्तांपृथि
वीमप्सुसंहरेत् रसादिजिह्वयासार्द्धंजलमग्नौविला
पयेत् रूपादिचत्तुषासार्द्धमग्निंवायौविलाप्यच स्पर्शा
दित्वग्युतंवायुमाकाशेचविलापयेत् अहंकारेहरेद्व्यो
मसशब्दंतन्महत्तापिमहत्तत्वंचप्रकृतौतांचब्रह्मणि
विलापयेत् इत्थंविलाप्यमतिमान्वामकुत्तौविचिंत
येत् पुरुषंकृष्णवर्णंचरक्तश्मश्रुविलोचनम् (रक)
(खड्गचर्म्मधरंक्रुद्धमंगुष्टपरिमाणकम् सर्वपापस्व
रूपंचसर्वदाधोमुखोस्थितम् ततस्तुवामनासायांयं
वीजंधूम्रवर्णकम् संचिन्त्यपूरयेत्तेनवायुंषोडशमात्र
या तेनपापात्मकंदेहंशोषयेत्साधकाग्रणीः नाभौ
रंरक्तवर्णंचध्यात्वातज्जातवह्निना चतुःषष्ट्याकुम्भकेन

म· नि तं २· 20

दहेत्पापरतंतनुम् ललाटेवारुणंवीजंशुक्लवर्णं
विचिन्त्यच द्वात्रिंशतारेचकेनप्लावयेदमृताम्भसा
आपादशीर्षपर्य्यन्तमाप्लाव्यतदनंतरम् उत्पन्नंभाव
येद्देहंनवीनंदेवतामयम् पृथ्वीवीजंपीतवर्णंमूलाधा
रेविचिन्तयन् तेनदिव्यावलोकेनदृढीकुर्य्यान्निजांत
नुम् हृदयेहस्तमादायआंह्रींक्रौंहंसउच्चरन् सोऽहंमं
त्रेणतद्देहेदेव्याःप्राणान्निधापयेत् भूतशुद्धिंविधाये
त्थंदेवीभावपरायणः समाहितमनाःकुर्य्यान्मातृका
न्यासमम्बिके मातृकायाऋषिर्ब्रह्मागायत्रीछन्दईरि
तम् देवतामातृकादेवीवीजंव्यंजनसंज्ञकम् स्वराश्च
शक्तयःसर्गःकीलकंपरिकीर्त्तितं लिपिन्यासेमहादे
विविनियोगःप्रयोगिता ऋषिन्यासंविधायैवंकरांगन्या
समाचरेत् अंआं॰मध्येकवर्गंच इंईं॰मध्येचवर्गकम्
उंऊं॰मध्येटवर्गंतु एंऐं॰मध्येतवर्गकम् ओंऔं॰मध्ये
पवर्गंचयादिक्षांतवरानपि विन्दुसर्गान्तरालेचषडंगे
मंत्रईरितः विन्यस्यन्यासविधिनाध्यायेन्मातृसरस्वती
म् पंचाशल्लिपिभिर्विभक्तमुखदोःपन्मध्यवक्षःस्थ
लांभास्वन्मौलिनिवद्धचन्द्रशकलामापीनतुंगस्तनीं
मुद्रामक्ष(क्ष)गुणंसुधाढ्यकलशंविद्यांचहस्ताम्बुजै
र्विभ्राणांविशदप्रभांत्रिनयनांवाग्देवतामाश्रये ध्या
त्वैवंमातृकांदेवींषट्चक्रेषुविन्यसेत् हं॰क्षं॰भ्रू
मध्यगेपद्मेकंठेचषोडशस्वरान् ॥

हृदम्बुजे कादिठान्तान् विन्यस्य कुलसाधकः डादिफान्ता
न्नाभिदेशे वादिलान्तांश्च लिंगके मूलाधारे चतःपत्रे
वादिसान्तान् प्रविन्यसेत् इत्यन्तर्म्मनसान्यस्य मातृका
र्णान् बहिर्न्यसेत् ललाटमुखवृत्ताक्षिश्रुतिघ्राणेषु गा
ण्डयोः ओष्ठदन्तोत्तमाङ्गास्यदोःपत्सन्ध्यग्रकेषु च पार्श्व
योः पृष्ठतो नाभौ जठरे हृदयांसयोः ककुद्यंसे च हृत्पूर्वं
पाणिपादयुगे ततः जठराननयोर्न्यसेन्मातृकार्णान्य
थाक्रमम् इत्थं लिपिं प्रविन्यस्य प्राणायामं समाचरेत् मा
याबीजं षोडशधा जप्त्वा वामेन वायुना पूरयेदात्मनो दे
हं चतःषष्ट्या तत्कुम्भयेत् कनिष्ठानामिकाङ्गुष्ठैर्नासा
सादृयेस्तयोः द्वात्रिंशता जपन् बीजं वा पुंदलेन रेचयेत्
पुनः पुनस्त्रिरावृत्त्या (आचम्य) प्राणायाम इति स्मृतः
प्राणायामं विधायैवमृष्यादिन्यासमाचरेत् अस्य मन्त्रस्य
ऋषयो ब्रह्मा ब्रह्मर्षयस्तथा गायत्र्यादीनि छन्दांसि आ
द्या काली तद्देवता आद्याबीजं बीजमिति शक्तिर्माया प्र
कीर्त्तिता कमला कीलकं प्रोक्तं स्थानेष्वेतेषु विन्यसेत्
शिरोवदनहृद्गुह्य-पादसर्वाङ्गकेषु च मूलमन्त्रेण ह
स्ताभ्यामापादमस्तकावधि मस्तकात्पादपर्य्यन्तं सम
यावात्त्रिधा न्यसेत् अयं तु व्यापकन्यासो यथोक्तफलसि
द्धः यद्बीजाद्या भवेद्विद्या तद्बीजेनाङ्गकल्पना अथवा मू
लमन्त्रेण षड्दीर्घेण विनापि वै अङ्गुष्ठाभ्यां तर्जनीभ्यां
मध्यमाभ्यां तथैव च अनामाभ्यां कनिष्ठाभ्यां करयोस्तलपृ

म·
नि·तं
२८

21

ष्टयोः नमः स्वाहा वषट् हुं च वौषट् फट् क्रमशः सुधीः
हृदयाय नमः पूर्वं शिरसे वह्निवल्लभा शिखायै वषड्
मुक्त्वा कवचाय हुमीरितम् नेत्रत्रयाय वौषट् च अस्त्राय
फडिति क्रमात् षडङ्गानि विधायेत्थं पीठन्यासं समाच
रेत् आधारशक्तिं कूर्म्मं च शेषं पृथ्वीं तथैव च सुधाम्बुधिं
मणिद्वीपं पारिजाततरुं ततः चिन्तामणिगृहं चैव मणि
माणिक्यवेदिकाम् तत्र पद्मासनं वीरो विन्यसेत् हृद
याम्बुजे दक्षवामांसयोर्वामकट्योर्दक्षकट्यो तथा धर्म्म
ज्ञानं तथैश्वर्य्यं वैराग्यं क्रमतो न्यसेत् मुखपार्श्वनाभि
दक्षपार्श्वे साधकसत्तमः नञ्पूर्वाण्येवतान्येव धर्म्मादी
नि यथाक्रमम् आनन्दकन्दे हृदये सूर्य्यसोमहुताशने
सत्त्वं रजस्तमश्चैव बिन्दुमुक्तादिमात्रैः केशरान् क
र्णिकां चैव पत्रेषु पीठनायिकाः मङ्गला विजया भद्रा
जयन्ती चापराजिता नन्दिनी नारसिंही च वैष्णवी त्वष्ट
नायिकाः असिताङ्गो रुरुश्चण्डः क्रोधोन्मत्तो भयङ्करः
कपाली भीषणश्चैव संहारी त्वष्टभैरवाः दलाग्रेषु न्य
सेदेतान् प्राणायामं ततश्चरेत् गन्धपुष्पैः समादाय
करकच्छपमुद्रया हृदि हस्तौ समाधाय ध्यायेद्देवीं
सनातनीम् ध्यानं तु द्विविधं प्रोक्तं स्वरूपारूपभेद
तः अरूपं तव यद्ध्यानमवाङ्मनसगोचरम् अव्य
क्तं सर्वतो व्याप्तमिदमित्थं विवर्जितम् अगम्यं योगि
भिर्गम्यं कृच्छ्रैर्बहुसमाधिभिः (शमादिभिः) मनसा

धारणार्थंयशीन्द्रंस्वाभीष्टसिद्धये सूक्ष्मध्यानप्रबोधाय
स्थूलध्यानंवदामिते अरूपायाःकालिकायाःकालमात
र्महाद्युतेः गुणक्रियानुसारेणक्रियतेरूपकल्पना मे
घांगीशशिशेखरांत्रिनयनांरक्ताम्बरंबिभ्रतींपाणिभ्याम
भयंवरंच(विलसद्र)विकसद्रक्तारविन्दस्थितांनृत्यंतं
पुरतोनिपीयमधुरंमाध्वीकमद्यंमहाकालंवीक्ष्य विका
सितानन वरामाद्यांभजेकालिकाम् एवंध्यात्वास्वशि
रसिपुष्पंदत्वाचसाधकः पूजयेत्परयाभक्त्यामानसै
रुपचारकैः हृत्पद्ममासनंदद्यात्सहस्रारच्युतामृतैः
पाद्यंचरणयोर्दद्यान्मनस्त्वर्घ्यंनिवेदयेत् तेनामृतेनाच
मनंस्नानीयमपिकल्पयेत् आकाशतत्वंवसनंगन्धंतु
गन्धतत्वकम् चित्तंप्रकल्पयेत् तेजस्तत्वञ्चदीपार्थे
नैवेद्यंचसुधाम्बुधिम् अनाहतध्वनिंघंटांवायुतत्वंच
चामरम् नृत्यमिन्द्रियकर्माणिचांचल्यंमनसस्तथा
पुष्पंनानाविधंदद्यादात्मनोभावसिद्धये अमायमनः
ङ्कारमरागममदंतथा अमोहकमदंभंचअद्वेषाक्षो
भकेतथा अमात्सर्यमलोभंचदशपुष्पंप्रकीर्तितं
अहिंसापरमंपुष्पंपुष्पमिन्द्रियनिग्रहः दयाक्षमाज्ञा
नपुष्पंपंचपुष्पंततःपरम् इतिपंचदशैःपुष्पैर्भावरू
पैःप्रपूजयेत् सुधाम्बुधिंमांसशैलंभर्जितंमीनपर्वत
म् मुद्राराशिंसुभक्तंचघृताक्तंपायसंतथा कुलामृत
ञ्चतत्पुष्पंपीठक्षालनवारिच कामक्रोधौ छागमहि

विधृत्यतौबलिंदत्वाजपंचरेत् मालावर्णमयीप्रोक्ताकु
ण्डलीसूत्रयंत्रिता सविन्दुमंत्रमुच्चार्यमूलमंत्रंसमुच्चरेत्
अकारादिलकारान्तमनुलोमइतिस्मृतः पुनर्लकारमार
भ्यश्रीकण्ठान्तमनुंजपेत् विलोमइतिविख्यातःक्षकारो
मेरुरुच्यते अष्टवर्गान्तिमैर्वर्णैःसहमूलमथाष्टकम्
एवमष्टोत्तरशतंजप्त्वानेनसमर्पयेत् एवमष्टोत्तरशतं
जप्त्वानेनसमर्पयेत् सर्वान्तरात्मनिलयस्वान्तर्ज्योतिःस्व
रूपिणि गृहाणेमंजपंमातराद्येकालिनमोऽस्तुते स
मर्प्यजपमेतेनसाष्टांगंप्रणमेद्धिया इत्यंतर्यजनंकृ
त्वावहिःपूजांसमारभेत् विशेषार्घ्यस्यसंस्कारस्तत्रादौ
कथ्यतेशृणु यस्यस्थापनमात्रेणदेवतासुप्रसीदति दृ
ष्ट्वार्घ्यपात्रंयोगिन्योब्रह्माद्यादेवतागणाः भैरवाश्चापि
नृत्यन्तिप्रीत्यासिद्धिंददत्यपि स्ववामेपुरतोभूमौसामा
न्यार्घ्यस्यवारिणा मायागर्भंत्रिकोणंचवृत्तंचचतुरस्र
कम् विलिख्यपूजयेत्तत्रमायावीजपुरःसरम् ॐ आधा
रशक्तिचनमःशाद्धारसान्निकाम् ततःप्रक्षालिताधा
रेविन्यस्यमण्डलोपरि मंवह्निमण्डलेॐ ऽन्तेदशकला
त्मनेततःनमोऽन्तेनचसंपूज्यतालयेदर्घ्यपात्रकंअस्त्रेणस्था
पयेत्तत्राधारोपरिसाधकः अमर्कमण्डलायाक्काद्वाद
शान्तकलात्मने नमोऽन्तेनयजेत्पात्रंमूलेनैवप्रपूरयेत्
त्रिभागमलिनापूर्य्यशेषंतोयेनसाधकः गन्धपुष्पेतत्रद
त्वापूजयेदमुनाम्बिके षष्ठस्वरविन्दुयुक्तंॐ ऽत्रंचन्द्रमं
ण्डलम् षोडशान्तेकलाशाह्वादात्मनेनमइत्यपि ॥

ततस्तैश्चफलैःपत्रैरक्षचन्दनचर्च्चितम् दुर्वापुष्पैस
त्तंतेनकृत्वातत्रनिधापयेत् मूलेनानीयचावाह्यत
त्रदेवींविभाव्यच पूजयेद्गन्धपुष्पाभ्यांमूलेनाष्टाद
शधाजपेत् धेनुयोनीर्दर्शयित्वाथदीपंप्रदर्शये
त् तदम्बुप्रोक्षणीपात्रेकिंचित्क्षिप्यसाधकः आत्मान
देयवस्तुनिप्रोक्षयेत्तेनमंत्रवित् पूजासमाप्तिपर्यन्त
मर्घ्यपात्रंनचालयेत् विशेषार्घ्यस्यसंस्कारःकथितो
यथाविधि इति यंत्रराजंप्रवक्ष्यामिसमस्तपुरुषार्थदम्
मायागर्भंत्रिकोणंचतद्वाह्येवृत्तयुग्मकम् तयोर्म्मध्ये
युग्मयुग्मक्रमात्षोडशकेशरान् तद्वाह्येऽष्टदलंप
द्मंतद्वहिर्भूपुरंलिखेत् चतुर्द्वारसमायुक्तंसुरेखंसु
मनोहरम् स्वर्णेवाराजतेताम्रेकुण्डगोलविलेपिते
स्वयम्भूकुसुमैःपुष्पैश्चन्दनागुरुकुंकुमैः कुशीदेना
थवालिखेत्स्वर्णमय्याशलाकया मालूरकंटकेनापि
मूलमंत्रंसमुच्चरन् विलिखेद्यंत्रराजन्तुदेवताभाव
सिद्धये अथवोत्कीर्णरेखाभिःस्फाटिकेविद्रुमेऽपि
वा वैदूर्य्येकारयेद्यंत्रंकारुकेणसुशिल्पिना शुभप्र
तिष्ठितंकृत्वास्थापयेत्स्वभवनान्तरे नश्यन्तिदुष्टभूता
निग्रहरोगभयानिच पुत्रपौत्रसुखैश्वर्य्यैर्मोदतेनरः
स्वमन्दिरम् दाताभर्त्तायशस्वीचभवेद्यंत्रप्रसादतः
एवंयंत्रंसमालिख्यरत्नसिंहासनेपुरः संस्थाप्यपीठ
न्यासोक्तविधिनापीठदेवताः संपूज्यकर्णिकामध्येपू

म॰
नि॰ तं
११

23

जयेन्मूलदेवताम् कलसस्थापनंवक्ष्येचक्रानुष्ठा
नमेवच येनानुष्ठानमात्रेणदेवतासुप्रसीदति मंत्र
सिद्धिर्भवेत्नूनमिच्छासिद्धिःप्रजायते कलांकलांगृही
त्वातुदेवनांविश्वकर्म्मणा निर्म्मितोऽयंसवैयस्मात्क
लसस्तेनकथ्यते षट्त्रिंशदंगुलायामंषोड़शांगुलमु
च्चकैः चतुरंगुलकंकंठम्मुखंतस्यषडंगुलम् पंचांगु
लिमितंमूलंविधानेघटनिर्म्मितौ सौवर्णंराजतंताम्र
कांश्यजंमृत्तिकोद्भवम् पाषाणंकाचजंवापिच्छिद्रमक्ष
तमव्रणम् कारयेद्देवताप्रीत्यैवित्तशाठ्यंविवर्ज्जयेत्
सौवर्णंभोगदंप्रोक्तंराजतंमोक्षदायकम् ताम्रंप्रीति
करंज्ञेयंकांस्यजंपुष्टिवर्द्धनम् काचंवश्यकरंप्रोक्तंष
पाणंस्तम्भकर्म्मणि मृण्मयंसर्वकार्य्येषुसुदृढंप
रिष्कृतम् स्ववामभागेषट्कोणंतन्मध्येव्रत्तरंध्रंके
म तद्बहिर्वृत्तमालिख्यचतुरस्रन्ततोवहिः सिन्दूररज
सावापिरक्तचन्दनकेनवा निर्म्मायमण्डलंतत्रयजेदा
धारदेवताम् मायामाधारशक्तिभ्योनमोऽन्तेनसमुद्ध
रेत् नमसाताडिताधारंस्थापयेन्मण्डलोपरि अस्त्रेण
ताडितंकुम्भंतत्राधारेनिवेशयेत् तकारादिक्षकारां
तैर्वर्णैर्बिन्दुसमाप्लुतैः मूलमप्युच्चरन्मंत्रीकारणेन
प्रपूरयेत् आधारकुम्भतीर्थेषुवह्न्यर्कशशिमण्डले
पूर्ववत्पूजयेद्विद्वान्देवीभावपरायणः रक्तचन्द
नसिन्दूररक्तमाल्यानुलेपनैः भूषयित्वातुकलसंप

वीकरणमाचरेत् फटादर्भेण संताड्य हूँ वीजेनावगुंठ
येत् ह्रीं दिव्यदृष्ट्या संवीक्ष्य नमसाभ्युक्षणं चरेत् मूले
नगंधंत्रिर्हृघ्यात् पंचीकरणमीरितम् प्रणम्य कलशं
रक्तपुष्पं दत्वा विशोधयेत् एकमेव परंब्रह्म स्थूलसू
क्ष्ममयं ध्रुवम् कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम्
सूर्यमण्डलमध्यस्थे वरुणालयसम्भवे अमावीज
मये देवि शुक्रशापाद्विमुच्यताम् वेदानां प्रणवो वीजे
ब्रह्मानन्दमयं यदि तेन सत्येन ते देवि ब्रह्महत्यां व्यपोह
तु । ह्रीं हंसः शुचिसद्वसुरंतरीक्षसद्धोता वेदिसदतिथि
र्दुरोणसत् नृसद्वरसदृतसत् गोजा अब्जा ऋतजा अद्रि
जा ऋतं बृहत् । वारुणेन च वीजेन षड्दीर्घस्वरभाजि
ना ब्रह्मशापविश्लेषिते मोचितायै पदं वदेत् स्वधादे
व्यै नमः पश्चात् सप्तधा ब्रह्मशापन्तु अंकुशे दीर्घषट्
केन युते श्रीं क्षाय याथुतम् स्वधा पश्चात् शुक्रशापं मोच
येति पदं ततः अमृते स्रावय द्वन्द्वं ह्रिंगंता मन्त्रीरितः
एवं शापान्मोचयित्वा यजेत्तत्र समाहितः आनन्दभैरवं
देवमानन्दभैरवीं ततः सहलमलशह्रांतेन वरयुंमिलि
तं वदेत् आनन्दभैरवं ङेऽन्तं वषडन्तो मन्त्रमीतः अस्याः
स्य विपरीतेन च स्वर्णो वामलोचना स्वधान्तं देव्यै वौषडन्तो
मन्त्रस्याः प्रपूजने सामरस्यं तयोर्लक्ष्य ध्यात्वा तदमृत
प्लुतम् द्रव्यं विभाव्य तस्माई मूलेन द्वादशधा जपेत् मू
लेन देवतां तु आदाय पुष्पांजलिं ततः दर्शयेद्धूपदीपौ

वघंटावादनपूर्वकम् इत्यंतीर्थस्य संस्कारः सर्वदा
देवपूजने व्रते होमे विवाहे च तथैवोत्सवकर्म्मणि
मांसमानीय पुरतस्त्रिकोणमण्डलोपरि फडाभ्युक्ष्य वा
युवह्निवीजाभ्यां मंत्रयेत्त्रिधा कवचेनावगुंठ्याथ संरक्षे
दास्त्रमंत्रतः पेत्वावमस्तीकृत्य मंत्रमेतमुदीरयेत्
विष्णोर्वक्षसि या देवी शंकरस्य च मांसं मे पवित्रीकु
रु तद्विष्णोः परमं पदम् इत्थं मीनं समानीय प्रोक्तमंत्रे
ण संस्कृतम् मंत्रेणानेन मतिमान् तं मीनमभिमंत्रयेत्
त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् उर्वारुकमिव
बन्धनान्मृत्योर्मुक्षीय मामृतात् तथैव मुद्रामादाय
शोधयेदमुना प्रिये तद्विष्णोः परमं पदं सदा पश्यंति सू
रयः दिवीव चक्षुराततम् । ॐ तद्विप्रासो विपण्यवो जा
गृवांसः समिन्धते विष्णोर्यत्परमं पदम् अथवा सर्वत
त्त्वानि मूलेनैव विशोधयेत् मूले तु श्रद्दधानो यः किं त
स्य दलशाखया केवलं मूलमंत्रेण यद्द्रव्यं शोधितं भवे
त् तदेव देवताप्रीत्यै सुशस्तमयोच्यते यथाकालस्यम
लेयात् साधकानवकाशतः सर्वं मूलेन संशोध्य महा
देव्यै निवेदयेत् न चात्र प्रत्यवायोऽस्ति नांगवैगुण्यपह्मण
सत्यं सत्यं पुनः सत्यमिति शंकरशासनम् इति श्रीमहा
निर्वाणतंत्रे सर्वतंत्रोत्तमोत्तमे सर्वधर्मनिर्णयसारे श्री
मदाद्यासदाशिवसंवादे मंत्रोद्धारकलशस्थापनतत्त्वसं
स्कारो नाम पंचमोल्लासः समाप्तः ॥

श्रीदेव्युवाच यत्त्वयाकथितंपंचतत्त्वंपूजादिकर्म्मणि
विशिष्यकथ्यतांनाथ यदितेऽस्तिकृपामयि श्रीसदा
शिवउवाच गौडीपैष्टीतथामाध्वीत्रिविधाचोत्तमासु
रा सैवनानाविधाप्रोक्तातालखर्जूरसम्भवा तथादेश
विभेदेननानाद्रव्यविभेदतः बहुधैवसमाख्याताप्रश
स्तादेवतार्च्चने येनकेनसमुत्पन्नायेनकेनाहृतापि
वा नात्रजातिविभेदोऽस्ति शोधितासर्वसिद्धिदा मांसन्तु
त्रिविधंप्रोक्तंजलभूचरखेचरम् यस्मात्तस्मात्समानी
तंयेनयेनविघातितम् तत्सर्वंदेवताप्रीत्यैभवेदेवन
संशयः साधकेच्छाबलवतीदेयेवस्तूनिदेवते यद्यदा
त्मप्रियंद्रव्यंतत्तदिष्टायकल्पयेत् बलिदानविधौ
देवि विहितःपुरुषःपशुः स्त्रीपशुर्नचहन्तव्यस्तत्रशा
म्भवशासनात् उत्तमास्त्रिविधामत्स्याःशालपाठीन
रोहिताः मध्यमाःकंटकैर्हीनाअधमाबहुकंटकाः
तेऽपिदेव्यैप्रदातव्यायदिसुष्ठुविभर्जिताः मुद्रापित्रिवि
धाप्रोक्ताउत्तमादिविभेदतः चन्द्रबिम्बनिभंशुभ्रंशा
लितण्डुलसम्भवम् यवगोधूमजंवापिघृतपक्वंम
नोरमम् मुद्रेयमुत्तमामध्याभृष्टधान्यादिसम्भवा भ
र्जितान्यन्यबीजानिअधमापरिकीर्तिता मांसंमीनश्च
मुद्राचफलमूलानियानिच सुधादानेदेवतायैसंस्तेषां
शुद्धिरीरिता विनाशुद्ध्याहितद्दानंपूजनंतर्पणंतथा
निष्फलंजायतेदेविदेवतानप्रसीदति शुद्धिंविनामद्य

म० नि० त०
२५

पानेकेवलं विषमलक्षणम् चिररोगी भवेन्मंत्री स्वल्पा
युर्म्रियतेऽचिरात् शोधितन्तु महेशानि निर्वीर्य्यं प्रबले
कलौ स्वकीया केवला ज्ञेया सर्व्वदोषविवर्जिता अथवा
त्र स्वयम्भ्वादिकुसुमं प्राणवल्लभे कथितं तत्प्रतिनिधौ
कर्षीदपरिकीर्त्तितम् अशोधितानि तत्त्वानि पत्रपुष्पफ
लानि च नैवद्यान्महादेव्यै दत्वा वै नारकी भवेत् श्रीपा
त्रस्थापनं कुर्य्यात् स्त्रीयया गुणशीलया अभिषिंचेत्सका
रणेन सामान्यार्घोदकेन वा आदौ बालां समुच्चार्य्य त्रिपु
रायै तत्तो वदेत् नमः शब्दावसाने च इमां शक्तिं सुदीरये
त् पवित्रीकुरु शब्दान्ते मम शक्तिं कुरु द्विठः अदीक्षिता
यदा नारी कर्णे मायां समुच्चरेत् शक्तयोऽन्याः पूजनीयाः
नार्च्चेलाड्नकर्म्माणि अथात्मयंत्रयोर्मध्ये मायागर्भं
त्रिकोणकम् हृत्तषट्कोणमालिख्य चतुरस्रं लिखेद्ब
हिः अस्रकोणपूर्णशैलमुड्डीयानं तथैव च जालन्ध
रे कामरूपं सचतुर्थ्यीनमोऽन्तकम् निजनामादिबीजा
द्यं पूजयेत् साधकोत्तमः षट्कोणेषु षडङ्गानि मूले
नैव त्रिकोणकम् मायामाधारशक्तिं च नमोऽन्तेन प्र
पूजयेत् नमसा तालिताधारं संस्थाप्य तत्र पूर्ववत्
हृतो परियजेड्ढ्रेः कलाः स्वस्वादिमात्तरैः धूम्रार्च्चिज्व
लिनी सूक्ष्मा ज्वालिनी विस्फुलिंगिनी सुश्रीः सुरूपा क
पिला हव्यकव्यवहा तथा सचतुर्थ्यीनमोऽन्तेन पूजयेद्व
ह्नेः कला दश मं वह्निमण्डलाय ति दशान्ते च कलात्मने

अवस्थानेन नमो दत्त्वा पूजयेद्वह्निमण्डलम् ततोऽर्घ्यपा
त्रमानीय फट्कारेण विशोधितम् आधारे स्थापयित्वा
तु कलाः सूर्यस्य द्वादश कभादिवर्णवीजेन ठडान्तेन
प्रपूजयेत् तपिनी तापिनी धूम्रा मरीचि ज्वालिनी रुचिः
सुषुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा अं सूर्यम
ण्डलाय ति द्वादशान्तकलात्मने नमोऽन्तेनार्घ्यपात्रं तु पू
जयेत् सूर्यमण्डलम् विलोममातृकां तद्वन्मूलमन्त्रम
मुच्चरन् त्रिभागं पूरयेन्मन्त्री कलशस्थेन हेतुना विशे
षार्घ्यजलैः शेषं पूरयित्वा समाहितः षोडशस्वरवीजे
न नाममन्त्रेण पूजयेत् सचन्द्रार्धनमोऽन्तेन कलाः सो
मस्य षोडश अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा पूर्णा
पूर्णामृता कामदायिन्यः शशिनः कलाः उं सोममण्डला
य ति षोडशान्तकलात्मने नमोऽन्तेन यजेन्मन्त्री पूर्ववत्
सोममण्डलम् उं वात्तने रक्तपुष्पं चर्वरामपराजिताम्
मायया प्रक्षिपेत् पात्रे तीर्थमावाहयेदपि कवचेनाव
गुण्ठ्याथ मुद्रया रक्षणं चरेत् धेन्वा चैवामृतीकृत्य छा
दयेन मत्स्यमुद्रया मूले सञ्जप्य दशधा देवतावाहनेन व
रेत् आवाहय पुष्पाञ्जलिना पूजयेदिष्टदेवताम् अर्घ्यण
दैः पंचमैत्रैर्मन्त्रयेत्तदनन्तरम् अखण्डैकरसानन्दा
करे परसुधात्मनि स्वच्छन्दस्फुरणामत्र निधेहि कुले
रूपिणि अनंगस्यामृताकारे शुद्धज्ञानकलेवरे अमृ

तत्वंनिधेयमस्मिन्वस्तुनिष्किञ्चनरूपिणि तद्रूपेणैकरसं
वक्तव्यंचैतन्यस्वरूपिणि भूत्वाकुलामृतकारमपिवि
स्फुरणेकुरु ब्रह्माण्डरससम्भृतमशेषरससम्भवम्
आपूरितंमहापात्रंपीयूषरसमावह अहंतापात्रभरित
मिदंतापरमामृतम् पराहंतामयेवह्नौहोमस्वीकार
लक्षणम् इत्यामंत्र्यततस्तस्मिन्शिवयोःसामरस्यकं
विभाव्यपूर्येद्रूपदीपावपिवदर्शयेत् इतिश्रीपात्रसं
स्कारःकथितःकुलपूजने अकृत्वापापभाङ्मंत्रीपूजाव
विफलाभवेत् घटश्रीपात्रयोर्मध्येपात्राणिस्थापयेद्गु
यः गुरुपात्रंभोगपात्रंशक्तिमात्रमतःपरम् योगिनी
वीरपात्रंचबलिपात्रंततःपरम् पाद्याचमनयोःपात्रं
श्रीपात्रेणनवक्रमात् सामान्यार्घ्यस्यविधिनापात्राणां
स्थापनंचरेत् कलशस्यामृतेनैवत्रिभागंपरिपूर्यच
माषप्रमाणंपात्रेषुशुद्धिखण्डंनियोजयेत् वामांगु
ष्ठानामिकाभ्याममृतंपात्रसंस्थितम् गृहीत्वाशुद्धि
खण्डेनदत्तयातत्वमुद्रया सर्वत्रतर्पणंकुर्यात्वि
धिरेषप्रकीर्तितः श्रीपात्रात्परमंबिन्दुंगृहीत्वाशु
द्धिसंयुतम् आनन्दभैरवंदेवंभैरवींचप्रतर्पयेत्
गुरुपात्रामृतेनैवतर्पयेत् गुरुपात्रामृतेनैवत
र्पयेद्गुरुसंततिम् सहस्रारेनिजगुरुंसपत्नी
कंप्रतर्पयेत् ॥ ॥

वाग्भवाद्यस्वस्वनाम्नान्तहृद्गुरुचतुष्टयम् ततः स्व
हृदयाम्भोजे भोगपात्रास्थेन च आद्याकालीं तर्पया
मि निजबीजपुरःसरं स्वाहान्तेन विद्यामन्त्रीं तर्पयेद्दि
ष्टदेवतां शक्तिपात्रास्थैस्तैस्तद्गावरणतर्पणम् यो
गिनीपात्रसंस्थेन सायुधां सपरिकराम् संतर्प्य कालि
कामाद्यां वटुकेभ्यो वलिं हरेत् स्ववामभागे सामान्यम
ण्डलं रचयेत्सुधीः संपूज्य स्थापयेत्तत्र सामिषान्नं स
पान्वितम् वाङ्मायाकमलावं च वटुकाय नमः पदं
संपूज्य पूर्वभागे च वटुकस्य वलिं हरेत् ततस्तु यां यो
गिनीभ्यः स्वाहा याम्ये हरेद्वलिम् षड्दीर्घयुक्तं स्व
र्नेत्रे क्षेत्रपालाय हृन्मनुः अनेन क्षेत्रपालाय वलिं दद्या
त्पश्चिमे क्षोंतबीजं समुद्धृत्य षड्दीर्घस्वरसंयुतम्
ङेऽन्तं गणपतिं चोक्त्वा वह्निजायान्ततो वदेत् उत्तरास्यां
गणेशाय वलिमेतेन कल्पयेत् मध्ये तथा सर्वभूतव
लिं दद्याद्यथाविधि ह्रीं श्रीं सर्वपदं चोक्त्वा विघ्नकृद्भ्य
स्ततो वदेत् सर्वभूतेभ्य इत्युक्त्वा हूं फट् स्वाहा मनुर्मतः
ततः शिवायै विधिवद्वलिमेकं प्रकल्पयेत् गृह्ण दे
वि महाभागे शिवे कालाग्निरूपिणि शुभाशुभफलं
व्यक्तं ब्रूहि गृह्ण वलिं तव मूलमेष वलिः पश्चात् शिवा
यै नम इत्यपि चक्रानुष्ठानमेतत्तु तवाग्रे कथितं शिवे
चन्दनागुरुकस्तूरीवासितं समनोहरम् सुधां गृहीत्वा
पाणिभ्यां करकच्छपमुद्रया नीत्वा स्वहृदयाम्भोजेऽधा

म॰
नि तं
२२

येदाध्यंपरानपराम् सहस्रारेमहापद्मेसंपुम्नाब्रह्म
वर्त्मना नीत्वासानन्दितोकृत्वाहृ हन्निम्प्रासवर्त्मना
द्वीपाद्वीपान्तरमिवतत्रपुष्पेनियोजयेच यंत्रेनिधापये
न्मत्रीहृद्भक्तिसमन्वितः कृतांजलिपुटोभूत्वाप्रार्थ
येदिष्टदेवताम् देवेशिभक्तिसुलभेपरिवारसम॰
न्विते यावत्त्वांपूजयिष्यामितावत्त्वंसुस्थिराभव
क्रींमाद्येकालिकेदेविपरिवारादिभिःसह इहागच्छेह
धाम्नोकाइहतिष्ठ द्वियापुनः इहशाद्वात्सन्निधेहिर
हस्वन्निपदान्ततः रुध्यस्वपदमाभाव्यममपूजांगृहाण
च इत्यमावाहनंकृत्वादेव्याःप्राणान्प्रतिष्ठयेत् आंह्रीं
क्रोंश्रीवह्निजायाप्रतिष्ठामन्त्रईरितः अमुष्यादेवतायाश्च
प्राणाइहततःपरम् प्राणाइतिततःपंचवीजानितद
नंतरम् अमुष्याजीवइहचस्थितइत्युवीरत्पुनः पंचवी
जान्यमुष्याश्चसर्वेन्द्रियाणिकीर्त्तयेत् पुनस्तत्पंचवी
जानिअमुष्यावचनात्ततः वाङ्मनोनयनघ्राणश्रोत्रत्व
क्पदतोवदेत् प्राणाइहागत्यसुखंचिरंतिष्ठन्तुठद्वय
इतिविधायंत्रमध्येलेलिहानाख्यमुद्रया संस्थाप्यविधि
वत्प्राणान्कृतांजलिपुटोवदेत् आद्येकालिस्वागतंते
सुस्वागतमिदंतव आसनेचेदमत्रत्वयास्यतांपरमेश्व
रि ततोविशेषार्घ्यजलेस्त्रिधामूलेनसम्बरन् प्रोक्षये
देवंस्त्वङ्गषडङ्गैःसकलीकृतिः देवतांगेषडंगाना
न्यासःस्यात्सकलीकृतिः ततःसंपूजयेदेवीषोडशोप

वार्केः पाद्यार्घ्याचमनीयं च स्नानं वसनभूषणे गन्ध
पुष्पे धूपदीपौ नैवेद्याचमने तथा अमृतैर्देवतां मूलं
तर्पणं च नतिक्रिया प्रयोजयेद्बुनायामुपचारांश्च षो
डश आद्याबीजमिदं पाद्यं देवतायै नमः पदम् पाद्यं च र
णयोर्हृद्यात शिवस्यार्घ्यं निवेदयेत् स्वाहापदेन मतिमा
न्स्वधेत्याचमनीयकम् मुखे नियोजयेत् मंत्री मधुप
र्कं मुखाम्बुजे वं स्वधेति स्नानार्घ्यं पुनराचमनीयकं
स्नानीयं सर्वगात्रेषु वसनं भूषणानि च निवेदयामि
मनुना दद्यादेतानि देशिकः मध्यमानामिकाभ्यां च
गन्धं दद्याद्धृदम्बुजे नमोंतेन च मंत्रेण वौषडंतेन पु
ष्पकम् धूपदीपौ च पुरतः संस्थाप्य पोलणादिभिः
निवेदयामि मंत्रेण उत्सृज्य तदनंतरम् जपध्वनिम
त्रमातः स्वाहेति मंत्रपूर्वकम् संपूज्य घंटां वामेन वाद
यन्दक्षिणेन तु धूपं दहीत्वा मतिमान्नासिकायोनि
योजयेत् दीपं तद्दृष्टिपथ्ये तद्दशधा भ्रामयेत् पुरः त
तः पात्रं च शुद्धिं च समादाय करद्वये मूलं समुच्चरन्मं
त्री यंत्रमध्ये निवेदयेत् परमं वारुणीकल्पं कोटिक
ल्पान्तकारिणि गृहाण शुद्धिसहितमदेहि मे मोक्षम
व्ययं ततः सामान्यविधिना पुरतो मण्डलं लिखेत् त
स्मिन्परिन्यसेत् पात्रं नैवेद्यपरिपूरितम् प्रोक्षणं चाव
गुंठनं च तत्रामृतीकृतम् मूलेन समयामंत्रं च
र्घ्यादिभिर्विनिवेदयेत् मूलमंत्रेण सिद्धान्नं सर्वोपकर

णान्वितम् निवेदयामीष्टदेव्यै पुर्णानंदमयीः शिवे
ततः प्राणादिमुद्राभिः पंचभिः प्राशयेत्सुधीः वामे नैवे
द्यमुद्रां च विकचोत्पलसन्निभाम् दर्शयेन्मूलमंत्रेण
पानार्थं तीर्थपूरितम् कलसं विनिवेद्याथ पुनराचमनी
यकम् ततः श्रीपात्रसंस्थेनामृतेन तर्पयेत् त्रिधा उत्त
मांगहृदाधारपादसर्वांगकेषु च पंचपुष्पांजलीन्दत्वा
मूलमंत्रेण देशिकः कृतांजलिपुटो भूत्वा प्रार्थयेदिष्ट
देवताम् नवावरणदेवीश्च पूजयामि नमो वदेत् अग्नि
निर्ऋतिवायवीशासु ततः पृष्ठतः क्रमात् षडंगानि वसं
पूज्य गुरुपंक्तीः समर्चयेत् गुरुं च परमाद्यं च परापर
गुरुं तथा परमेष्ठिगुरुं चैव यजेत्कुलगुरूनिमान्
गुरुपात्रामृतेनैव त्रिस्त्रिस्तर्पणमाचरेत् ततो हृद
लमध्ये तु पूजयेदष्टनायिकाः मंगला विजया भद्रा
जयंती चापराजिता नंदिनी नारसिंही च कौमारी चा
ष्टमातरः दलाग्रेषु यजेदष्टभैरवान्साधकोत्तमः अ
सितांगो रुरुश्चंडः क्रोधोन्मत्तो भयंकरः कपाली भी
षणश्चैव संहारोष्टौ च भैरवाः इंद्रादिदशदिक्पालान्
भूपुरे तु प्रपूजयेत् तेषामस्त्राणि तद्बाह्ये पूजयेत्तत
र्पयेत्ततः सर्वोपचारैः संपूज्य बलिं दद्यात्समाहितः
मृगश्छागश्च मेषश्च लुलापः शूकरस्तथा शल्लकी श
शको गोधा कूर्मः खड्गी दश स्मृताः अन्यानपि प्र
दद्यात् साधकेच्छानुसारतः मूलतत्त्वपशुं देव्या अग्रे

संस्थाप्य मंत्रवित् अर्घोदकेन संप्रोक्षयेत् मुद्रामस्त्रीकृ
ते कृत्वाह्वागायपशवे नमः इत्यमुना सुधीः संपूज्य ग
न्धसिन्दूरपुष्पैर्नैवेद्यपावसा गायत्रीन्दलितोकर्णेज
पेत् पाशविमोचनीम् पशुपाशाय शर्हाने विद्महे प
दमुच्चरेत् विश्वकर्म्मणे वपद्रात् धीमहीति पठेद्वदे
त् ततश्चोदीरयेत् मंत्री तन्नो जीवः प्रचोदयात् पश्चात्
पशुगायत्री पशुपाशविमोचनी ततः खड्गे समादा
य कूर्चबीजेन पूजयेत् तदाग्रमध्यमूलेषु क्रमतः पू
जयेदिमान् वागीश्वरीं च ब्रह्माणं लक्ष्मीनारायणौ
ततः उमामहेश्वरौ मूले पूजयेत् साधको नमः अनं
तरं ब्रह्मविष्णुशिवशक्तियुताय च खड्गाय नमः इ
त्येतमनुना खड्गपूजनम् महावाक्येन चीनस्त्ज
कृतांजलिपुटो वदेत् यथोक्तेन विधानेन त्वभ्यम
स्तु समर्पितम् इत्थं निवेद्य च पशुं भूमिसंस्थं तु का
रयेत् देवीभावपरो भूत्वा हन्यात्तीव्रप्रहारतः स्व
यमाथ पुत्रैर्वा भ्राता वा सुहृदेव वा सपिण्डेना
थवा छेत्ता नारिपते नियोजयेत् ततः कबोलेकृ
धिरं वटकेभ्यो बलिं हरेत् सप्रदीपशीर्षबलिं मा
देव्यै निवेदयेत् एवं बलिविधिः प्रोक्तः कौलिका
नां कुलार्च्चने तस्माद्देवताप्रीतिर्जायते न कदाच
न ततो होमं प्रकुर्वीत तद्विधानं शृणु प्रिये स्वदक्षि
णे वालुकाभिर्मण्डलं चतुरस्रकम् चतुर्हस्तपरिमि

तं कृत्वा मूलेन वीक्षणम् अस्त्रेण ताडयित्वा च तेनैव
भ्युक्षणं चरेत् कूर्च्चबीजेनावगुण्ठ्य देवतानामपूर्वकं
स्थण्डिलाय नम इति यजेत् साधकसत्तमः प्रागग्रा उ
दगग्राश्च रेखाः प्रादेशसम्मिताः तिस्रस्तिस्रो विधात
व्यास्तत्र संपूजयेदिमान् प्रागग्रासु च रेखासु मुकुन्देश
पुरन्दरान् ब्रह्मवैवस्वतेन्दूंश्च उत्तराग्रासु पूजयेत्
ततः स्थण्डिलमध्ये तु हसौः गर्भं त्रिकोणकम् षट्को
णं तद्बहिर्वृत्तं ततोष्टदलपंकजम् भूपुरं तद्बहिर्वि
द्वान् विलिखेद्दर्शयन्नमुम् मूलेन पुष्पाञ्जलिना सं
पूज्य प्रणवेन तु होमद्रव्याणि संप्रोक्ष्य कर्णिकायां य
जेत् सुधीः मायामाधारशक्त्यादीन् प्रत्येकं वात्र पूजयेत्
अग्न्यादिकोणे धर्म्मं च ज्ञानं वैराग्यमेव च ऐश्वर्य्यं पूजयि
त्वा तु पूर्वादिषु दिशाक्रमात् अधर्म्ममज्ञानमिति अवैरा
ग्यमनन्तरम् अनैश्वर्य्यं यजेन्मन्त्री मध्येऽनन्तं च पद्मक
म् कलासहितसूर्य्येन्दुसोमस्य मण्डलं प्रागादिके
शरेषु मध्ये चैताः प्रपूजयेत् पीता श्वेता अरुणा कृष्णा
धूम्रा तीव्रा तथैव च स्फुलिङ्गिनी च रुचिरा ज्वलिनीति
यथाक्रमात् प्रणवादिनमोन्तेन सर्वत्र पूजनं चरेत् रं
वह्न्यासनायेति नमोन्तेन प्रपूजयेत् वागीश्वरीमृतु
स्नातां नीलेन्दीवरलोचनाम् वागीश्वरेण संयुक्तां ध्यात्वा
तामत्र तदासने मायया तां प्रपूज्याथ वह्निं वह्निमा
नयेत् मूलेन वीक्षणं कृत्वा फटावाहनमाचरेत् प्रण

वंच ततो वह्नेर्योगपीठाय हृन्मनुः यंत्रे पीठं प्रपूजयि
त्वा दिक्षु त्रेताः प्रपूजयेत् वामा ज्येष्ठा तथा रौद्रीत्यग्नि
केति यथाक्रमात् ततोऽमुष्या देवतायाः स्थण्डिला
य नमः पदं इति स्थण्डिलमापूज्य तन्मध्ये मूलरूपिणी
म् ध्यात्वा वागीश्वरीं देवीं वह्निबीजपुरःसरम् वह्निमु
द्धृत्य मूलोक्तं कूर्चं मंत्रं समुच्चरन् क्रव्यादेभ्यो वह्निजाया
क्रव्यादांशं परित्यजेत् अस्त्रेण वह्निसम्वीत्य कूर्चेनेवा
वगुंठयेत् धेन्वा चैवामृतीकृत्य हस्ताभ्यामथ कुण्डेरत
प्रादक्षिण्यक्रमेणाग्निं भ्रामयेत् स्थण्डिलोपरि त्रिधा जा
नुस्पृष्टभूमिः शिवबीजं विचिंतयेत् आत्मनोऽभिमुखी
कृत्य योनियंत्रे नियोजयेत् ततो मायासमुद्भाव्य वह्नि
मूर्त्तिं वह्नियुताम् नमोऽन्तेन प्रपूज्याथ रं वह्निपरतः
सुधीः चैतन्याय नमो वह्नेश्चैतन्यं परिपूजयेत् नम
सा वह्निमूर्त्तिं च चैतन्यं परिकल्प्य च प्रज्वालयेत्ततो व
ह्निं मंत्रेणानेन मंत्रवित् प्रणवं पूर्वमुद्धृत्य चित् पिंग
लपदं तथा हनद्वयं दहदहपचपचेति ततो वदेत् स
र्वज्ञाज्ञापय स्वाहा वह्निप्रज्वालने मनुः ततः कृतांज
लिर्भूत्वा प्रकुर्य्यादग्निवन्दनम् अग्निं प्रज्वलितं वन्दे जा
तवेदं हुताशनम् सुवर्णवर्णममलं समिद्धं सर्वतो
मुखम् इत्युपस्थाप्य दहनेच्छादयेत् स्थण्डिलं कुशैः
लिष्टनाम्ना वह्निनामकृत्वाभ्यर्चनमाचरेत् नागैवस्था
नरपदात् जातवेदपदं वदेत् इहावहावहेत्युक्त्वालो

हितान्तपदांतरम् सर्वकर्म्माणिपदतः साधयांतेऽग्नि
वल्लभा इमम्पर्क्ष्महिरण्यादिसप्तजिह्वाः प्रपूजयेत्
सहस्रार्च्चिः पदंडे· न्ते हृदयायनमोवदेत् षडंगपूजये
द्धृहेस्ततोमूर्त्तीर्यजेत्सुधीः जातवेदःप्रभृतयोमूर्त्ते
योऽष्टौप्रकीर्त्तिताः ततोयजेदष्टशक्तीर्ब्राह्म्याद्यास्तद
नंतरम् पद्माद्यष्टनिधीन्निष्ठायजेदिन्द्रादिदिक्पतीन्
वज्राद्यस्त्राणिसंपूज्यप्रादेशपरिमाणकम् कुशपत्रद्व
यंनीत्वाघृतमध्येनिधापयेत् वामेध्यायेदिडांनाडीपि
गलांदक्षिणेतथा मध्येसुषुम्नांसंचिंत्यदक्षभागात्
समाहितः आज्यंगृहीत्वामतिमान्दक्षनेत्रेहुताशि
नः मंत्रेणानेनजुहुयात्प्रणवांतेऽग्नयेपदम् स्वाहां
तोमनुराख्यातोवामभागाद्विहरेत् वामनेत्रेजुहे
द्धृहेसोमायहितोमनुः मध्यादाज्यंसमानीललाट
हव्यंनिवरेत् अग्निसोमोसप्रणवोतूर्ष्णहिवचनान्वितो
स्वाहांतोऽयंमनुःप्रोक्तः पुनर्दक्षिणतोहविः गृहीत्वा
नमस्तांमंत्रीप्रणवंपूर्वमुच्चरेत् अग्नयेचस्विष्टिकृते
वह्निकांतांततोवदेत् अनेनवह्निवदनेजुहुयात्
साधकोत्तमः भूर्भुवःस्वर्हितोनेनव्याहृत्याहोममा
चरेत् तारोवैश्वानरपदाज्जातवेदइहावह वहलोहि
पदांतेचतालसर्वपदंवदेत् कर्म्माणिसाधयस्वाहावि
धानेनाहुतीर्हरेत् ततोऽग्नौस्विष्टमावाह्यपीठादेः सह
पूजनम् कृत्वास्वाहांतमनुनामूलेनपंचविंशती हु

त्वा वह्न्यात्मनो देव्या ऐक्यं सम्भावयन् धिया एकादशा
हुतीर्हुत्वा मूलेनैवाङ्गदेवताः हुत्वा सकामस्तु हिषप
तिलाज्यमधुमिश्रितैः पुष्पैर्बिल्वदलैर्वापि यथाविहित
वस्तुभिः यथाशक्त्याहुतिं दद्यात्राष्टमूर्नां प्रकल्पयेत्
ततः पूर्णाहुतिं दद्यात् फलपत्रसमन्विताम् स्वाहान्तमू
लमन्त्रेण ततः संहारमुद्रया तस्माद्देवीं समानीय स्थाप
येत् हृदयाम्बुजे तमस्त्विति वमन्त्रेण विसर्जनं मंहुताश
नम् कृतदक्षिणको मन्त्री अच्छिद्रमवधारयेत् हुतशे
षं ध्रुवां मध्ये धारयेत् साधकोत्तमः एष होमविधिः श्री
कः सर्वत्रागमकर्म्मणि होमकर्म्म समाप्यैवं साधको
जपमाचरेत् विधानं शृणु देवेशि येन विद्या प्रसीदति
देवतागुरुमन्त्राणामैक्यं सम्भावयेद्धिया मन्त्राणां दे
वताः प्रोक्ता देवतागुरुरूपिणी अभेदेन यजेद्यस्तु
तस्य सिद्धिरनुत्तमा गुरुं शिरसि सञ्चिन्त्य देवतां हृदया
म्बुजे रसनायां मूलविद्यां तेजोरूपां विचिन्त्य च त्रयाणां
तेजसात्मानमेकीभूतं विचिन्तयेत् तारेण सम्पुटीकृत्य
मूलमन्त्रं च सप्तधा जप्त्वा तु साधकः पश्चान्मातृकापुटि
तं स्मरेत् मायाबीजे स्वशिरसि दशधा प्रजपेत् सुधीः व
दने प्रणवं तद्वत्पुनर्मायां हृदम्बुजे प्रजप्य सप्तधा
मन्त्री प्राणायामं समाचरेत् ततो मालां समादाय प्रवा
लादिसमुद्भवाम् माले माले महामाले सर्वशक्तिस्वरू
पिणि चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव इति

म॰ संपूज्य तां मालां श्रीपात्रस्थामृतेनच त्रिधा मूलेन संतर्प्य
नि॰तं॰ स्थिरचित्तो जपं चरेत् अष्टोत्तरसहस्रं वाप्यथवाष्टोत्तरस
३१ हस्रं वाप्यथवाष्टोत्तरं शतम् प्राणायामं ततः कृत्वा श्री
31 पात्रजलपुष्पकैः गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्
कृतं जपम् सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि
इति मंत्रेण मतिमान् देव्या वामकराम्बुजे तेजोरूपं ज
पफलं समर्प्य प्रणमेद्बुधः ततः कृतांजलिर्भूत्वा स्तो
त्रं च कवचं पठेत् ततः प्रदक्षिणीकृत्य विशेषार्घ्येण
साधकः विलोमार्घ्यप्रदानेन कुर्यादात्मसमर्पणम्
इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतः जाग्रत्स्वप्न
सुषुप्त्यनेऽवस्थासु प्रकीर्तयेत् मनसा तेन वदेद्वाचा
कर्म्मणा तदनंतरम् हस्ताभ्यां पदतः पद्भ्यामुदरेण
ततः परम् शिस्त्रया यत्कृतं चोक्तायत्स्मृतं पदतो व
देत् यदुक्तं तत्सर्वमिति ब्रह्मार्पणमुदीरयेत् भवतु
ते मां मदीयं सकलं तदनंतरम् आद्याकालीपदाम्भोजे
अर्पयामि पदं वदेत् प्रणवं तत्सदित्युक्त्वा कुर्यादात्म
समर्पणम् ततः कृतांजलिर्भूत्वा प्रार्थयेदिष्टदेवतां
मायाबीजं समुच्चार्य्य श्रीआद्ये कालिके वदेत् पूजितासि
यथाशक्त्या क्षमस्वेति विसृज्य च संहारमुद्रया पुष्पमा
घ्राय स्थापयेत् हृदि पेशान्यां मण्डलं कृत्वा त्रिकोणसु
परिष्कृतम् तत्र संपूजयेद्देवीं निर्माल्यपुष्पवारिणा
ह्रीं निर्माल्यपदं चोक्त्वा वासिन्यै नमः इत्यपि ब्रह्मविस

शिवादिभ्यः सर्वदेवेभ्य एवच नैवेद्यं विनरेत् पश्चाद्
गृह्णीयात् शक्तिसाधकः स्वीयशक्तिं वामभागे संस्था
प्यहृष्टयगासने एकासनोपविष्टवा पात्रं कुर्यान्मनोर
मम् पानपात्रं प्रकुर्वीत न पंचतोलकाधिकम् तोल
कत्रितयान्न्यूनं स्वार्णं राजतमेव च अथवा काचजनितं
नारिकेलोद्भवं वा आधारोपरि संस्थाप्य शुद्धिपात्रं स
दक्षिणे महाप्रसादमानीय पात्रेषु परिवेशयेत् स्वयं
वा भ्रातृपुत्रैर्वा ज्येष्ठानुक्रमतः सुधीः पानपात्रं तथा
देयाशेष्य शुद्ध्यादिकानि च ततः सामयिकैः सार्द्धं पान
भोजनमाचरेत् आदावास्तरणार्थाय गृह्णीयात् शुद्धि
मत्तमाम् ततोऽतिहृष्टमनसा समस्तः कुलसाधकः
स्वस्वपात्रं समादाय परमामृतपूरितम् मूलाधारादिजि
ह्वान्तो विद्रूपां कुलकुण्डलीम् विभाव्य तन्मुखाम्भोजे
मूलमन्त्रं समुच्चरन् परस्परात्तामादाय जुहुयात् कुण्ड
लीमुखे अलिपानं कुलस्त्रीणां गन्धस्वीकारलक्षणम् सा
धकानां रहस्यानां पंचपात्रं प्रकीर्तितम् अतिपानात्
कुलीनानां सिद्धिहानिः प्रजायते यावन्न चालयेत् दृष्टिं
यावन्न चालयेन्मनः तावत्पानं प्रकुर्वीत पशुपानमतः
परम् पाने भ्रान्तिर्भवेद्यस्य घृणी च शक्तिसाधके स पा
पिष्ठः कथं ब्रूयादाद्यां कालीं भजाम्यहं यथाबलार्पितैः
द्रादैस्पृष्टदोषा न विद्यते तथान्नवप्रसादेऽपि जातिभेदं
विसर्जयेत् एवमेव विधानेन कुर्यात् पानं च भोजनम्

हस्तप्रक्षालनेनाक्षितवं नैवेद्यमेव वै लेपावनोदनं कु
र्य्याद्गण्डूषेणापाद्यसापि वा ततो निर्म्माल्यकुसुमं विधिस्य
शिरसा सुधीः यत्र ले पं कुर्व्वं देशि विहरेद्देववद्भुवि इति
श्रीमहानिर्वाणतंत्रे सर्व्वतंत्रोत्तमोत्तमे सर्व्वधर्म्मनिर्णय
सारे श्रीमदाद्यासदाशिवसंवादे श्रीपात्रस्थापनहोमच
क्रानुष्ठानकथनेनामषष्ठोल्लासः ॥

श्रुत्वाद्याकालिकादेव्या मंत्रोद्धारं महाफलम् सौभाग्यमो
तननंतं ब्रह्मज्ञानैकसाधनम् प्रातःकृत्यं तथा स्नानं
सन्ध्यां सम्विद्विशोधनम् न्यासपूजाविधानं च वाह्याभ्यं
तरभेदतः वलिप्रदानं होमं च चक्रानुष्ठानमेव च महा
प्रसादस्वीकारं पार्वती हृष्टमानसा विनयावनता देवी
प्रोवाच शंकरं प्रति श्रीदेव्युवाच सदाशिव जगन्नाथ
जगतां हितकारक कृपया कथितं देव पराप्रकृतिसाध
नम् सर्व्वप्राणिहितकरं भोगमोक्षैककारणम् विशेष
तः कलियुगे जीवानामाशुसिद्धिदम् तव वागमृताम्भो
धौ निमज्जन्मम मानसं नोप्यातृप्तमीहते स्वैरं भूयः शोध
यतेः चिरात् पूजाविधौ महादेव्याः स्तवितं न प्रकाशितम्
स्तोत्रं च कवचं देव तदिदानीं प्रकाशय श्रीसदाशिव उवा
च शृणु देवि जगद्वन्द्ये स्तोत्रमेतदनुत्तमम् पठनात्श्र
वणाद्यस्य सर्व्वसिद्धीश्वरो भवेत् असौभाग्यप्रशमनं सु
खसम्पद्विवर्द्धनम् अकालमृत्युहरणं सर्व्वापद्विनिवा
रणम् श्रीमदाद्याकालिकायाः सुखसान्निध्यकारणम्

स्तवस्यास्य प्रसादेन त्रिपुरारिरहं शिवे स्तोत्रस्यास्य ऋषि
र्देवि सदाशिव उदाहृतः छन्दोऽनुष्टुब्देवता या कालिका
परिकीर्त्तिता ह्रींकाली श्रींकराली च क्रींकल्याणी कला
वती कमला कलिदर्पघ्नी कपर्दीश कृपान्विता कालि
का कालमाता च कालानलसमद्युतिः कपर्दिनी करा
लास्या करुणामृतसागरा कृपामयी कृपाधारा कृपा
पारा कृपागमा कृशानुः कपिला कृष्णा कृष्णानन्दवि
वर्द्धिनी कालरात्रिः कामरूपा कामपाशविमोचनी का
दम्बिनी कलाधारा कलिकल्मषनाशिनी कुमारीपूज
नप्रीता कुमारीपूजकालया कुमारीभोजनानन्दा कुमा
रीरूपधारिणी कदम्बवनसंचारा कदम्बवनवासिनी
कदम्बपुष्पसंतोषा कदम्बपुष्पमालिनी किशोरीक
लकंठा च कलनादनिनादिनी कादम्बरीपानरता तथा
कादम्बरीप्रिया कपालपात्रनिरता कंकालमाल्यधारि
णी कमलासनसंतुष्टा कमलासनवासिनी कमला
लयमध्यस्था कमलामोदमोदिनी कलहंसगतिः क्लै
व्यनाशिनी कामरूपिणी कामरूपकृतावासा कामपी
ठविलासिनी कमनीया कल्पलता कमनीयविभूषणा
कमनीयगुणाराध्या कोमलांगी कृशोदरी कारणामृत
संतोषा कारणानन्दसिद्धिदा कारणानन्दजापेष्टा कार
णार्चनहर्षिता कारणार्णवसंमग्ना कारणव्रतपालिनी
कस्तूरीसौरभामोदा कस्तूरीतिलकोज्ज्वला कस्तूरीपूज

नरताकस्तूरीपूजकप्रियाकस्तूरीदाहजननीकस्तूरी
पूजकप्रियाकस्तूरीदाहजननीकस्तूरीमृगतोषिणी
कस्तूरीभोजनप्रीताकर्पूरचन्दनोक्षिता कर्पूरकारणा
ह्लादाकर्पूरामृतपायिनी कर्पूरसागरस्नाताकर्पूरसा
गरालया कूर्चबीजजपप्रीताकूर्चजापपरायणा कुलीना
कौलिकाराध्याकौलिकप्रियकारिणी कुलाचाराकौतु
किनीकुलमार्गप्रदर्शिनी काशीश्वरीकष्टहर्त्रीकाशी
शवरदायिनी काशीश्वरकृतामोदाकाशीश्वरमनोर
मा कलमंजीरचरणाक्वणत्कांचीविभूषणा कांचना
द्रिकृतागाराकांचनाचलकौमुदी कामबीजजपानन्दा
कामबीजस्वरूपिणी कुमतिघ्नीकुलीनार्तिनाशिनीकु
लकामिनी क्रीं ह्रीं श्रीं मन्त्रवर्णेन कालकंटकघातिनी इ
त्याद्याकालिकादेव्याः शतनामप्रकीर्तितम् ककारकू
टघटितंकालीरूपस्वरूपकम् पूजाकालेपठेद्यस्तु
कालिकाकृतमानसः मन्त्रसिद्धिर्भवेदाशुतस्यकाली
प्रसीदति बुद्धिंविद्यांचलभतेगुरोरादेशमात्रतः धनवा
न्कीर्तिमान्भूयाद्दानशीलोदयान्वितः पुत्रपौत्रसु
खैश्वर्यैर्मोदतेसाधकोभुवि भौमावास्यानिशानिशा
भागेमपञ्चकसमन्वितः पूजयित्वामहाकालीमाद्यांत्रि
भुवनेश्वरीम् पठित्वाशतनामानिसाक्षात्कालीमयो
भवेत् नासाध्यंविद्यतेतस्यत्रिषुलोकेषुकिंचन विद्या
यांवाक्पतिःसाक्षाद्धनेधनपतिर्भवेत् समुद्रइव

गाम्भीर्य्ये बलेच पवनोपमः तिग्मांशुरिव दुष्प्रेक्षः शा
शिवत्शुभदर्शनः रूपेमूर्त्तिधरः कामो योषितां हृ
दयंगमः सर्वत्र जयमाप्नोति स्तवस्यास्य प्रसादतः यं
यंकामं पुरस्कृत्य स्तोत्रमेतदुदीरयेत् तंतंकाममवा
प्नोति श्रीमदाद्याप्रसादतः रणेराजकुले द्यूते विवादे
प्राणसंकटे दस्युग्रस्ते ग्रामदाहे सिंहव्याघ्रावृते तथा
अरण्ये प्रान्तरे दुर्गे ग्रहराजभयेऽपिवा ज्वरदाहे चिरव्या
धौ महारोगादिसंकुले बालग्रहादिरोगे च तथा दुःस्व
प्नदर्शने दुस्तरे सलिले वापि पोते वातविपद्गते वि
चिन्त्य परमां मायामाद्यां कालीं परात्पराम् यः पठेच्छ
तनामानि दृढभक्तिसमन्वितः सर्वापद्भ्यो विमुच्ये
त देवि सत्यं न संशयः न पापेभ्यो भयं तस्य न रोगेभ्यो भ
यं क्वचित् सर्वत्र विजयस्तस्य न कुत्रापि पराभवः तस्य
दर्शनमात्रेण पलायन्ते विपद्गणाः स वक्ता सर्वशा
स्त्राणां स भोक्ता सर्वसम्पदाम् स कर्त्ता जातिधर्माणां
ज्ञातीनां प्रभुरेवसः वाणी तस्य वसेद्वक्त्रे कमला निश्च
ला गृहे तन्नाम्ना मानवाः सर्वे प्रणमन्ति ससम्भ्रमाः दृष्ट्या
तस्य तृणायन्ते ह्यणिमाद्यष्टसिद्धयः आद्याकालीस्वरू
पाख्यं शतनाम प्रकीर्त्तितम् अष्टोत्तरशतावृत्या पुरश्च
र्य्यास्य गीयते पुरस्क्रियान्वितं स्तोत्रं सर्वाभीष्टफल
प्रदम् शतनामस्तुतिमिमामाद्याकालीस्वरूपिणीम्
पठेद्वा पाठयेद्वापि सर्वपापविनिर्मुक्तो ब्रह्मसायुज्यमा

म·
नि· तं·
३४
34

यात् श्रीसदाशिव उवाच कथितं परमं ब्रह्म प्रकृतेः
स्तवने महत् आद्यायाः श्रीकालिकायाः कवचं शृणु सांप्र
तम् त्रैलोक्यविजयस्यास्य कवचस्य ऋषिः शिवः छंदो
ऽनुष्टुप् देवता च आद्याकाली प्रकीर्त्तिता मायाबीजं बीज
मिति रमाशक्तिरुदाहृता क्रींकीलकं काम्यसिद्धौ विनि
योगः प्रकीर्त्तितः ह्रीं माद्या मे शिरः पातु श्रीं काली वदनं
मम हृदयं क्रीं पराशक्तिः पायात् कंठं परात्परा नेत्रे
पातु जगद्धात्री कर्णौ रक्षतु शंकरी घ्राणं पातु महामा
या रसनां सर्वमंगला दंतान् रक्षतु कौमारी कपोलौ
कमलालया ओष्ठाधरौ क्षमा रक्षेत् चिबुकं चारुहासिनी
ग्रीवां पायात् कुलेशानी ककुत्पातु कृपामयी द्वौ बाहू
बाहुदा रक्षेत् करौ कैवल्यदायिनी स्कंधौ कपर्द्दिनी पा
तु पृष्ठं त्रैलोक्यतारिणी पार्श्वं पायादपर्णा मे कटिं मे क
मठासना नाभौ पातु विशालाक्षी प्रजास्थानं प्रभावती
ऊरू रक्षतु कल्याणी पादौ मे पातु पार्वती जयदुर्गावतु प्रा
णान् सर्वांगं सर्वसिद्धिदा रक्ताहीनं तु यत्स्थानं वर्जि
तं कवचेन च तत्सर्वं मे सदा रक्षेत् आद्याकाली सनातनी
इतितेकथितं दिव्यं त्रैलोक्यविजयाभिधं कवचं कालि
कादेव्या आद्यायाः परमाद्भुतम् पूजाकाले पठेद्यस्तु आ
द्याधिकृतमानसः सर्वान् कामानवाप्नोति तस्याद्या सुप्र
सीदति मंत्रसिद्धिर्भवेदाशु किंकराः क्षुद्रसिद्धयः अपुत्रो
लभते पुत्रं धनार्थी प्राप्नुयाद्धनम् विद्यार्थी लभते विद्यां

कामी कामानवाप्नुयात् सहस्रावृत्तपाठेन वर्म्मणोऽस्य
पुरस्क्रिया पुरश्चरणसम्पन्नं यथोक्तफलदं भवेत् चन्द
नागुरुकस्तूरीकुङ्कुमै रक्तचन्दनैः भूर्ज्जे विलिख्य गुटि
कां स्वर्णस्थां धारयेद्यदि शिखायां दक्षिणे बाहौ कण्ठे वा
साधकः कटौ तस्याद्या कालिका वश्या वाञ्छितार्थं प्रय
च्छति न कुत्रापि भयं तस्य सर्वत्र विजयी कविः अरोगी चिर
जीवी स्याद्बलवान् धारणक्षमः सर्वविद्यासु निपुणः स
र्वशास्त्रार्थतत्त्ववित् वशे तस्य महीपाला भोगमोक्षौ क
रस्थितौ कलिकल्मषयुक्तानां निःश्रेयसकरं परम्॥
श्रीदेव्युवाच कथितं कृपया नाथ स्तोत्रं कवचमेव च अ
धुना श्रोतुमिच्छामि पुरश्चर्याविधिं विभो॥ श्रीसदाशि
व उवाच यो विधिर्ब्रह्ममन्त्राणां पुरश्चरणकर्म्मणि स ए
वाद्याकालिकाया मन्त्राणां विधिरुच्यते अशक्तः साधको दे
वि जपपूजाहुतादिषु पूजासंक्षेपतः कार्य्या पुरश्चरण
मेव च यतो हि निरनुष्ठानात्स्वल्पानुष्ठानमुत्तमम् संक्षे
पपूजने भद्रे तत्रादौ शृणु कथ्यते आचम्य मूलमन्त्रेण
ऋषिन्यासमाचरेत् करशुद्धिं ततः कुर्य्यान्न्यासं च क
रदेहयोः सर्व्वाङ्गव्यापकं कृत्वा प्राणायाममाचरेत् सुधीः
ध्यानं पूजां जपं चेति संक्षेपपूजने विधिः पुरस्क्रियायां
मन्त्राणां यत्र यो विहितो जपः तस्माच्चतुर्गुणं जपात् पुर
श्चर्या विधीयते॥ अथवान्यप्रकारेण पुरश्चरण
मुच्यते कृष्णां चतुर्दशीं प्राप्य कुजे वा शनिवासरे पंचत

म: नि·तं· ३५
35

त्वंसमानीयपूजयित्वाजगन्मयीं महानिशायामयुतं
जपेन्मंत्रमनन्यधीः भोजयित्वाब्रह्मनिष्ठान् पुरश्चर
णकृद्भवेत् कुजवासरमारभ्ययावन्मंगलवासरम्
प्रत्यहंप्रजपेन्मंत्रंसहस्रपरिसंख्यया वसहसंख्यजपेने
वभवेन्मंत्रपुरश्क्रिया श्रीआद्याकालिकामंत्राः सिद्धमं
त्राः स्वसिद्धिदाः सदासर्वयुगेदेविकलिकालेविशेषतः
कालीरूपाणिवहयाकलौजाग्रतिपार्वति प्रबलेकलि
कालेतद्रूपमेतज्जगाडितम् नात्रसिद्ध्याद्यपेक्षास्तिना
रिमित्रादिदूषणम् नियमानियमेनापिजगन्नाथीप्रसा
दयेत् ब्रह्मज्ञानमवाप्नोतिश्रीमदाद्याप्रसादतः ब्रह्मज्ञा
नयुतोमर्त्योजीवन्मुक्तोनसंशयः नवप्रयासबाहुल्यं
कायक्लेशोऽपिनप्रिये आद्याकालीसाधकानांसाधने
सुखसाधनम् चित्तसंशुद्धिरेवात्रमंत्रिणांफलदायिनी
यावन्नचित्तकलिलंह्यासमुत्तसहतेव्रती तावत्कर्म
प्रकुर्वीतकुलभक्तिसमन्वितः यथावद्विहितकर्मवि
नशुद्धौहिकारणम् आदौमंत्रंगुरोर्वक्त्राद्गृह्णीयात्स्व
लमत्रवत् प्रातःकृत्यादिनियमान्कृत्वाकुर्यात्पुर
स्क्रियाम् चित्तेशुद्धेमहेशानिब्रह्मज्ञानंप्रजायते ब्रह्म
ज्ञानेसमुत्पन्नेकृत्याकृत्यंनविद्यते श्रीपार्वत्युवाच
कुलेकिंपरमेशानकुलाचारश्चकिंविभो लक्षणंपंचत
त्त्वानांश्रोतुमिच्छामितत्त्वतः श्रीसदाशिवउवाच सम्य
क्पृष्टंकुलेशानिसाधकानांहितैषिणी कथयामित

श्रीमेयथावदवधारयजीवेश्वकृतितत्त्वंचदिक्काला
काशमेवच स्तिमपतेजोवायवश्चकुलमित्यभिधीय
ते ब्रह्मविद्यानिर्विकल्पमेतेषामावरणंचयत् कुलाचा
रःसएवाद्येयम्मकामार्थमोक्षदः बहुजन्मार्जितैः
पुण्यैस्तपोदानदृढव्रतैः क्षीणपापानांसाधकानांकुला
चारेमतिर्भवेत् कुलाचारगताबुद्धिर्भवेदाशुसुनि
र्मला तथाचरणाम्भोजेमतिस्तेषांप्रजायते सद्गु
रोःसेवयाप्राप्यविद्यामेतांपरात्पराम् कुलाचाररं
ताभूत्वापंचतत्त्वैःकुलेश्वरीम् यजेततःकालिकामाद्यां
कुलज्ञाःसाधकोत्तमाः इहभुक्त्वाखिलान्भोगानन्त
जेत्ययेतेनिरामयम् मोहोद्वेगघ्नजीवानांदुःखविस्मा
रके महानन्दजनकंयद्वितदाद्यतत्त्वलक्षणम्
श्वसंस्कृतंचयत्तत्त्वमोहदंभ्रमकारणम् विवादरोग
जननंत्याज्यंकौलैःसदाप्रिये ग्राम्यवायव्यवन्यानांपु
ष्टंतत्पुष्टिवर्द्धनम् बुद्धितेजोबलकरंद्वितीयतत्त्वल
क्षणम् जलोद्भवंयत्कल्याणिकमनीयंसुखप्रदम्
प्रजावृद्धिकरंवापितृतीयतत्त्वलक्षणम् सुलभंभू
मिजातंचजीवानांजीवनंचयत् आयुर्मूलंत्रिजगतां
चतुर्थतत्त्वलक्षणम् महानन्दकरंदेविप्राणिनांसृ
ष्टिकारणम् अनाद्यन्तजगन्मूलंशेषतत्त्वस्यलक्षणम्
आद्यतत्त्वंविद्धितेजोद्वितीयंपवनंप्रिये अपस्तृतीयं
जानीहिचतुर्थंपृथिवींशिवे पंचमंजगदाधारंवियद्वि

म॰
नि॰ तं॰
३९

द्विवरानने इत्थं ज्ञात्वा कुलेशानि कुलतत्त्वानि पंच च
आचारं कुलधर्मस्य जीवन्मुक्तो भवेन्नरः॥ इति श्रीमहा
निर्वाणतंत्रे सर्वतंत्रोत्तमोत्तमे सर्वधर्मनिर्णयसारे श्री
मदाद्यासदाशिवसंवादे स्तोत्रकवचकुलतत्त्वलक्ष
णकथनं नाम सप्तमोल्लासः॥ श्रुत्वा धर्मान् बहुविधा
न् भवानी भवमोचनी हिताय जगतां माता भूयः शंक
रमब्रवीत्॥ श्रीदेव्युवाच श्रुतं बहुविधं धर्ममि
हामुत्रसुखप्रदम् धर्मार्थकामदं विघ्नहरं निर्वाण
कारणम् साम्प्रतं श्रोतुमिच्छामि ब्रूहि वर्णाश्रमान् वि
भो त्वयैव विहिताचाराः कृपया वद तानपि श्रीसदा
शिव उवाच चत्वारः कथिता वर्णा आश्रमाश्चापि सुव्रते
आचारश्चापि वर्णानामाश्रमाणां पृथक् पृथक् कृता
दौ कलिकाले तु वर्णाः पंच प्रकीर्त्तिताः ब्राह्मणः क्षत्रि
यो वैश्यः शूद्रः सामान्य एव च एतेषां सर्ववर्णानामा
श्रमौ द्वौ महेश्वरि तेषामाचारधर्मांश्च शृणुष्व वद
मि ते पुरैव कथितं तावत् कलिसंभवचेष्टितम् तपः
स्वाध्यायहीनानां नृणामल्पायुषामपि क्लेशप्रयासा
शक्तानां कुतो देहपरिश्रमः ब्रह्मचर्याश्रमो नास्ति वा
णप्रस्थोऽपि न प्रिये गार्हस्थो भिक्षुकश्चैव आश्रमौ द्वौ
कलौ युगे गृहस्थस्य क्रियाः सर्वा आगमोक्ताः कलौ शि
वेनात्ममार्गैः क्रियासिद्धिः कदापि गृहमेधिनाम् भ
वेत्केऽप्याश्रमे देवि वेदान्ते दण्डधारणम् कलौ नास्ति

वतन्त्रेयतस्तत्रश्रौतसंस्कृतिः शैवसंस्कारविधिना
वधूताश्रमधारणम् तदेवकथितंभद्रे संन्यासग्रह
णंकलौ विप्राणामितरेषांचवर्णानांप्रबलेकलौ उभय
त्राश्रमेदेवि सर्वेषामधिकारिता सर्वेषामेवसंस्काराःक
र्म्माणिशैववर्त्मना विप्राणामितरेषांचकर्म्मलिंगपृ
थक्पृथक् जातमात्रोगृहस्थःस्यात्संस्कारादाश्रमी
भवेत् गार्हस्थ्यंप्रथमंकुर्य्यात्यथाविधिमहेश्वरि त
त्वज्ञानेसमुत्पन्नेवैराग्येजायतेयदा तदासर्वंपरित्य
ज्यसंन्यासाश्रममाश्रयेत् विद्यामुपार्ज्जयेद्बाल्येधनंदारां
श्चयौवने प्रौढेधर्म्याणिकर्म्माणिचतुर्थेप्रव्रजेत्सुधीः
मातरंपितरंवृद्धंभार्य्यांचैवपतिव्रताम् शिशुंचतनयंहि
त्वानावधूताश्रमंव्रजेत् मातॄःपितॄन्शिशून्दारान्स्व
जनान्बान्धवानपि यः प्रव्रजतिहित्वैतान्समहापात
कीभवेत् मातृहापितृहासस्यात्स्त्रीवधीब्रह्मघातकः
असंतर्प्यस्वपित्रादीन्योगच्छेद्भिक्षुकाश्रमे ब्राह्मणा
दिषुभिन्नेषुसर्ववर्णेषुसंस्क्रियाम् शैवेनवर्त्मनाकु
र्य्यादेषधर्म्मःकलौयुगे श्रीदेव्युवाच कोवाधर्म्मोगृह
स्थस्यभिक्षुकस्यचकिंविभो विप्रस्यविप्रभिन्नानांसंस्का
रादीनिमेवद श्रीसदाशिवउवाच गार्हस्थ्यंप्रथमंधर्म्मं
सर्वेषामनुजन्मनाम् तदेवकथयाम्याद्येशृणुष्वैकाग्रचि
त्ततः ब्रह्मनिष्ठोगृहस्थःस्यात्ब्रह्मज्ञानपरायणः य
द्यत्कर्म्मप्रकुर्वीततद्ब्रह्मणिसमर्पयेत् नमिथ्याभा

षणं कुर्य्यात् न च शाठ्यं समाचरेत् देवतातिथिपूजा
सु गृहस्थो निरतो भवेत् मातरं पितरं चैव साक्षात्प्रत्य
क्षदेवताम् मत्वा गृही निषेवेत सदा सर्वप्रयत्नतः तु
ष्टायां मातरि शिवे तुष्टे पितरि पार्वति तव प्रीतिर्भवेद्दे
वि परब्रह्म प्रसीदति त्वमाद्या जगतो माता पिता ब्रह्म प
रात्परम् युवयोः प्रीणनं यस्मात् तस्मात् किं गृहिणां
तपः आसनं शयनं वस्त्रं पानं भोजनमेव च तत्तत्सर्वं
यथाज्ञाय मात्रे पित्रे नियोजयेत् श्रावयेन्मृदुलां वाणीं
सर्वदा प्रियमाचरेत् पित्रोराज्ञानुसारी स्यात् सत्पुत्रः
कुलपावनः औद्धत्यं परिहासं च तर्ज्जनं परिभाषणम्
पित्रोरग्रे न कुर्वीत यदीच्छेदात्मनो हितम् मातरं पित
रं वीक्ष्य नत्वोत्तिष्ठेत् ससम्भ्रमः विनाज्ञया नोपविशेत्
संस्थितः पितृशासने विद्याधनमदोन्मत्तो यः कुर्य्यात्
पितृहेलनं स याति नरकं घोरं सर्वधर्मबहिष्कृतः
मातरं पितरं पुत्रं दारानतिथिसोदरान् हित्वा गृही न
भुञ्जीयात् प्राणैः कण्ठगतैरपि वञ्चयित्वा गुरून् बन्धून्
यो भुङ्क्ते स्वोदरम्भरः इहैव लोके गर्ह्योऽसौ परत्र नार
की भवेत् गृहस्थो पोषयेद्दारान् विद्यामभ्यासयेत् सु
तान् पोषयेत् स्वजनान् बन्धून् एष धर्मः सनातनः ज
नन्या वर्द्धितो देहो जनकेन प्रयोजितः स्वजनैः शिक्षितः
प्रीत्या सोऽधमस्तान् परित्यजेत् एषामर्थे महेशानि कृ
त्यजेत् एषामर्थे महेशानि कृत्वा कष्टशतान्यपि प्रीणयेत्

मतेनेशक्कायधर्म्मोयंसनातनः सधन्यःपुरुषोलोके
सकृतीपरमार्थवित् ब्रह्मनिष्ठःसत्यसंधोयोभवेद्गृ
हिमानवः नभार्य्यांताडयेत्क्वापिमातृवत्पालयेत्
सदा नत्यजेद्घोरकष्टेऽपियदिसाध्वीपतिव्रता स्थिते
षुस्वीयदारेषुस्त्रियमन्यांनसंस्पृशेत् दुष्टेनचेतसावि
द्वानन्यथानारकीभवेत् विरलेशयनेवासंत्यजेत्प्रा
ज्ञःपरस्त्रिया अयुक्तभाषणंचैवस्त्रियंशौर्य्यंनदर्शये
त्धनेनवाससाप्रेम्णाश्रद्धयामृतभाषणैः संततंतोष
येद्दारान्नाप्रियंक्वचिदाचरेत् उत्सवेलोकयात्रायां
तीर्थेष्वन्यनिकेतने नपत्नींप्रेषयेत्प्राज्ञःपुत्रामात्य
विवर्जिताम् यस्मिन्नरेमहेशानितुष्टाभार्य्यापतिव्र
ता सर्वोधर्म्मःकृतस्तेनभवतीप्रियएवसः चतुर्वर्षा
वधिसुतान्लालयेत्पालयेत्पिता ततःषोडशपर्य्य
न्तेगुणान्विद्यांचशिक्षयेत् विंशत्यब्दाधिकान्पुत्रान्प्रे
रयेद्गृहकर्म्मसु ततस्तांस्तुल्यभावेनमत्वास्नेहंप्रद
र्शयेत् कन्याप्येवंपालनीयाशिक्षणीयातियत्नतः देया
वरायविदुषेधनरत्नसमन्विता एवंक्रमेणभ्रातॄंश्च
स्वसृभ्रातृसुतानपि ज्ञातीन्मित्राणिभृत्यांश्चपालये
त्तोषयेद्गृही ततःस्वधर्म्मनिरतानेकग्रामनिवासिनः
अभ्यागतानुदासीनान्गृहस्थःपरिपालयेत् यद्येवंना
चरेद्देविगृहस्थोविभवेसति पशुरेवसविज्ञेयःसपापी
लोकगर्हितः निद्रालस्यंदेहयत्नंकेशविन्यासमेवच

म॰
नि॰ तं॰
३८

38

आसक्तिमशनेवस्त्रेनातिरिक्तंसमाचरेत् युक्ताहारो
युक्तनिद्रोमितवाङ्मितमैथुनः स्वच्छोनम्रःशुचिर्दक्षो
युक्तःस्यात्सर्वकर्मसु शूरःशौर्यो विनीतःस्याद्वात्यवे
गुरुसन्निधौ जुगुप्सितान्नमन्येतनावमन्येतमानिनः
सौहार्दव्यवहारोस्य प्रवृत्तिप्रकृतिलक्षणम् सहवासेन
तर्कैश्चविदित्वाविश्वसेत्ततः उसेद्वेतूरपितुज्ञातसम
येवीक्ष्यबुद्धिमान् प्रदर्शयेदात्मभावान्नैवधर्मविलंघ
येत् स्वीयंयशःपौरुषंचस्वसमयेकथितंनवयत् कृतंय
उपकारायधर्मज्ञोनप्रकाशयेत् ये जुगुप्सितप्रवृत्तौ
चनिश्चितेऽपिपराजये गुरुणालघुनावापियशस्वी
नविदारयेत् विद्याधनंयशोधर्मान्यत्नमानऽउपार्ज
येत् व्यसनंचासतांसंगंमिथ्योद्रोहंपरित्यजेत् अवस्था
नुगताश्चेष्टाःसमयानुगताःक्रियाः तस्मादवस्थास
मयेवीक्ष्यकर्मसमाचरेत् योगक्षेमरतोदक्षोधार्मिकः
प्रियवाक्यवः मितवाङ्मितहासःस्याद्ग्राम्याग्रेत्तविशेष
श्चजितेन्द्रियःप्रसन्नात्मात्वार्जितःस्याद्दृढव्रतः अप्रमत्तोदी
र्घदर्शीमोक्षाख्यधानः विचारयेत् सर्वंमृदुश्रोयेथीरो वा
क्वहितकंरवेदत् आसीनकर्षंनक्षानिम्नापेक्षापरिव
र्जयेत् जलाशयाश्रमद्वार्थविश्रामगृहमध्येनिसेत्तुः प्र
तिष्ठितोयेनतेनलोकत्रयंजितम् संतुष्टोपिनरोयस्मिन्नुप
रताःसुहृदगणाउपायति यदयशोलोकात्सेन् लो
कत्रयं जितम् ।

सत्यमेव व्रतं यस्य दयादीनेषु सर्वथा कामक्रोधौ व
शौ यस्य तेन लोकत्रयं जितम् विरक्तः परदारेषु निस्पृ
हः परवस्तुषु दम्भमात्सर्यहीनो यस्तेन लोकत्रयं
जितम् न बिभेति रणाद्यो वै संग्रामेष्वपराङ्मुखः
धर्म्मयुद्धे मृतो वापि तेन लोकत्रयं जितम् असंशयात्मा
सच्छ्रद्धः शाम्भवाचाररतत्परः भक्त्याशने हितो यस्ते
न लोकत्रयं जितम् ज्ञानिना लोकमात्रा ये सर्वत्र सम
दृष्टिना क्रियन्ते येन कर्म्माणि तेन लोकत्रयं जितं शौ
चं तद्विविधं देवि बाह्याभ्यन्तरभेदतः ब्रह्मण्यात्माप
र्पणं यत्तत् शौचमान्तरिकं स्मृतम् अद्भिर्वा भस्मना वा
पि मलानामपकर्षणम् देहशुद्धिर्भवेद्येन वहिः
शौचं तदुच्यते गंगानद्यो ह्रदा वाप्यपाश्च तल्लकाः
सर्वे पवित्रजननं स्वर्नदीकमतः प्रिये तस्मात्तु याज्ञि
के श्रेष्ठे स्नात्वा मलवर्जिता वासोऽजनतृणादीनि
स्पृष्ट्वा नीहि सम्भ्रान्ते किमत्र वहुनोक्तेन शौचाशौ
चविधौ शिवे मनःपूतं भवेद्येन गृहस्थस्तत्तदाच
रेत् निष्ठीते मैथुनस्यान्ते त्यागान्ते मलमूत्रयोः भोजनां
ते मलसंस्पृष्टे वहिःशौचं विधीयते सन्ध्यात्रैकालिकी
कार्या वैदिकी तान्त्रिकी क्रमात् उपासनाया भेदेन प्र
जां कुर्याद्यथाविधि ब्रह्ममन्त्रोपासकानां गायत्रीजप
तो प्रिये ज्ञानाद्ब्रह्मेति तद्ध्यानं सन्ध्या भवति वैदिकी
अन्येषां वैदिकी सन्ध्या सूर्योपस्थानपूर्वकम् अर्घ्यदाने

म·
नि·तं·
३९

39

द्विवेशङ्गायत्रीजपनेतया अष्टोत्तरंसहस्रंवाशतंवाद
शधासिवा जपाद्वा नियमोभद्रेसर्वत्राह्निककर्म्माणि
शूद्रसामान्यजातीनामधिकारोऽस्तिकेवलम् आगमोक्त
वैर्थोदविसर्वसिद्धिस्ततोभवेत् प्रातःसूर्य्योदयःकालो
मध्याह्नस्तदनंतरम् सायंसूर्य्यास्तसमयस्त्रिकालानाम
यंक्रमः श्रीदेव्युवाच विप्रादिसर्ववर्णानांविहितातांत्रि
कीक्रिया त्वयैवकथितानाथसम्प्राप्तेप्रबलेकलौ तदि
दानींकथंदेवविप्रान्वैदिककर्म्माणि नियोजयसित
त्सर्वंविशेषाद्वक्तुमर्हसि श्रीसदाशिवउवाच सत्यंब्र
वीषितत्त्वज्ञेसर्वेषांतांत्रिकीक्रिया लोकानांभोगमोक्षा
यसर्वकर्म्मसुसिद्धिदा इयंतुब्रह्मसावित्रीयथाभव
तिवैदिकी तथैवतांत्रिकीज्ञेयाप्रशस्तोभयकर्म्मणि
ततोऽत्रकथितंदेविद्विजानांप्रबलेकलौ गायत्र्यामधि
कारोऽस्तिनान्यमंत्रेषुकर्हिचित् तारायाकमलायाचवा
ग्भवायाकमलायाचवाग्भवायायथाक्रमात् ब्राह्म
णक्षत्रियविशांसावित्रीकथिताकलौ द्विजादीनांप्रभेदो
र्थंशूद्रसंभवःपरमेश्वरि सन्ध्येयंवैदिकीप्रोक्ताप्रायेवह्निक
कर्म्मणाम् अन्यथाशाम्भवैर्मार्गैःकेवलैःसिद्धिभाग
भवेत् सत्यंसत्यंपुनःसत्यंसत्यमेतन्नसंशयः कालात्य
येऽपिसन्ध्येयकर्त्तव्यादेववन्दिते ॐतत्सत्ब्रह्मवा
चार्य्यमात्रेणाभिरतात्तैः आसनेवसनेपात्रेशय्यायाने
निकेतनम् गृह्यकेवस्तुजातेचसच्छातस्वच्छेप्रशस्यते

समाप्याह्निककर्माणि स्वाध्यायं गृहकर्म वा गृहस्थानि
यतेत्कुर्य्यान्नैव तिष्ठेन्निरुद्यमः पुण्यतीर्थे पुण्यतिथौ ग्र
हणे चन्द्रसूर्य्ययोः जपे दाने प्रकुर्वाणः श्रेयसां निलयो
भवेत् कलावन्नगतप्राणा नोपवासः प्रशस्यते उपवा
सप्रतिनिधावेकं दानं विधीयते कलौ दानं महेशानि
सर्व्वसिद्धिकरं भवेत् न तन्मात्रे केवलं त्तेयो दरिद्रः सत्
क्रियान्वितः मासवत्सरपर्व्वणामारम्भदिनमासिके
चतुर्दश्यष्टमीस्वक्रान्त्यैकादशीकुहूः निजजन्म
दिने चैव पित्रोर्म्मरणवासरः वैधात्सव दिने चैव पु
ण्यकालः प्रकीर्त्तितः गंगानदी महानद्यो गुरोः सदान
मेव च प्रसिद्धदेवतालेत्रे पुण्यतीर्थं प्रकीर्त्तितम् समा
स्वाध्ययने पित्रोः शुश्रूषा दारलक्षणम् नरकाद्धि भवेत्ती
र्थेतीर्थावपत्रनतानृणाम् न तीर्थसेवा नारीणां नोपवा
सादिकाः क्रियाः नैवव्रतानां नियमा भर्त्तुः शुश्रूषणं
विना भर्त्तैव योषितां तीर्थं तपो दानं व्रतं गुरुः तस्मात्
सर्व्वात्मना नारी पतिसेवां समाचरेत् पत्युः प्रियं सदा
कुर्य्याद्देववत् परिचर्य्यया तदाज्ञानुवर्त्ती भुक्त्वा तोष
येत् पतिवाक्यवान् नैतत् प्रतिकूलं वा श्रावयेन्नैव
दुर्वचः नाप्रियं मनसा वापि चरेद्भर्त्तुः पतिव्रता काये
न मनसा वाचा सर्व्वदाप्रियकर्म्मभिः या प्रीणयति भ
र्त्तारं सैव ब्रह्मपदं लभेत् नान्यवक्त्रं निरीक्षेत नान्यैः स
म्भाषणं चरेत् न वांगं दर्शयेदन्यान् भर्त्तुराज्ञानुसारिणी

म॰ नि॰ तं॰ ध॰

तिष्ठेत्पित्रोर्वशे बाल्ये भर्त्तुः सम्प्राप्तयौवने वार्द्धके पति
कुल्यानां न स्वतन्त्रा भवेत् क्वचित् अज्ञातपतिमर्य्यादाम्
ज्ञातपतिसेवनाम् नोद्वाहयेत्पिता बालामज्ञातधर्म्म
शासनाम् नरमांसेन भुंजीयात् नराकृतिपशूंस्तथा
बहूपकारकान् गाश्च मांसदान् रसवर्ज्जितान् फलानि
ग्राम्यवन्यानि मूलानि विविधानि च भूमिजातानि सर्वा
णि भोज्यानि स्वेच्छया शिवे अध्यापनं याजनं च विप्राणां
व्रतमुत्तमम् अशक्तौ क्षत्रियविशां वृत्त्या निर्वाहमाचरे
त् राजन्यानां च सद्वृत्तिः संग्रामो भूमिशासनम् अश
क्तौ वणिग्वृत्त्या शूद्रवृत्त्या न तथाश्रयेत् वाणिज्यं शाक्तवैश्या
नां शूद्रवृत्तमदूषणम् शूद्राणां परमेशानि सेवा वृत्ति
र्विधीयते सामान्यानां तु वर्णानां विप्रवृत्तमवृत्तिषु
अधिकारोऽस्ति देवेशि देहयात्राप्रसिद्धये अद्वेष्टा निर्म्म
मः शान्तः सत्यवादी जितेन्द्रियः निर्म्मत्सरो निष्कपटः
स्ववृत्तो ब्राह्मणो भवेत् अध्यापयेत्पुत्रवद्वा शिष्या
न् सन्मार्गवर्त्तिनः सर्वलोकहितैषी स्यात् पक्षपात
विनिर्म्मुक्तः मिथ्यालापमसूयां च ग्रामसवाप्रि··· षठे
नीचैः प्रसक्तिं दम्भं च सर्वथा ब्राह्मणस्त्यजेत् शुद्रतस्या
गर्हितास्सत्योऽसत्मानैः सन्धिकृतमा ष्टमज्जेयो वायु
द्धेषु राजन्यो वा रणे न अलोभी स्यात्प्रजावृत्ते गृह्णी
यात्सम्मितं करम् स्वलंगीकृतधर्म्मं पुत्रवत्पाल
येत्प्रजाः न्यायेषु डे तथा सन्धिकर्म्माणि मान्त्रियानिव

मंत्रिभिः सहकुर्वीत विचार्य्य सर्वथा नमः धर्म्मयुद्धे
नयोद्धव्यंन्यायदण्डपुरस्क्रिया करणीयायथाशास्त्रं
सन्धिंकुर्य्याद्यथावलम् उपायैःसाधयेत्कार्य्यंयुद्ध
सन्धिवशत्रुभिः उपायानुगताः सर्वाजयन्तेसविभूत
यः स्यान्नीचसंग्राहिरतःसदाविद्वज्जनप्रियः धीरोवि
पन्नोदत्तश्चशीलवान्सस्मितव्यथी निपुणोद्धवसंर
कटेशास्त्रशिलाविचक्षणः स्वसैन्यभावान्वेषीस्यान्नशि
तयेद्गुणकौशलम् नहन्यान्मूर्छितान्युद्धेत्यक्तश
स्त्रान्पराङ्मुखान्वलानीतान्रिपून्दैविरिपुदा
रशिशूनपि जयलब्धानिवस्तूनिसन्धिग्रामानिया
नि च वितरेत्तानिसैन्येभ्योयथायोग्यविभागतः शौर्य्य
हीनेचयोद्धृणांनैयराज्ञापृथक्पृथक् वहुसैन्याधिप
नैकंकुर्य्यादात्महितेरतः नैकस्मिन्विश्वसेद्राजानै
कंस्वार्थेनियोजयेत् सोम्यत्रीडापहासंचनीचैःसहविव
र्जयेत् वहुश्रुतःस्वल्पभाषीजिज्ञासुर्ज्ञानवानपिवहु
मानोऽपिनिर्दम्भोयौवराज्यपदप्रमादयोः स्वयंवाचरदृ
ष्ट्यावाप्रजाभावान्विलोकयेत् एवंस्वजनभावानेभ्रा
वान्पश्येन्नराधिपः क्रोधाद्दम्भात्प्रमादाद्वासन्माने
शासनेतथा सहसानैवकर्त्तव्यंस्वामिनातत्त्वदर्शिना
सैन्यसेनाधिपामात्यवनितापत्यसेवकाः पालनीयाः
सदोषाश्चेद्दण्ड्याराज्ञायथाविधि उन्मत्तानसमर्थांश्च
वालांश्चमत्तवात्यवान ज्वराभिभूतान्वृद्धांश्चरक्षयेत्

म· नि· तं ५२

पितरश्चयः वैश्यानां कृषिवाणिज्यं ह्येतद्विहितसनातनम्
येनोपायेन लोकानां देहयात्रा प्रसिध्यति अतः सर्वात्मना
देवि वाणिज्ये कृषिकर्मसु प्रमादव्यसनालस्यमिथ्या
शाठ्यं विवर्जयेत् निश्चित्य वस्तुतन्मूल्यमुभयोः सम्म
तौ शिवे परस्यांगीकरणं क्रयसिद्धिस्ततो भवेत् मत्त
विक्षिप्तबालानामरिग्रस्तन्दणां प्रिये रोगविध्वस्तबुद्धीना
मसिद्धो दानविक्रयौ क्रयसिद्धिरदृष्टानां गुणश्रवणतो
भवेत् विपर्य्ययेन तद्गुणानामन्यथा भवति क्रयः क्री
जरोषु तरंगाणां गुप्तदोषप्रकाशनात् वर्षातीतेऽपि
तत्क्रयमन्यथाकर्त्तुमर्हति धर्मार्थकाममोक्षाणां
भाजनं मानवं वपुः अतः कुलेशि तत्क्रेयानुसिध्येत्म
मशासनात् यवगोधूमधान्यानां लाभो वर्षगते प्रिये
शुक्लस्वर्णधातूनामष्टमः परिकीर्त्तितः ऋणे कृषौ
च वाणिज्ये तथा सर्वेषु कर्मसु यद्यदंगीकृतं मर्त्यै
स्तत्कार्य्यं शास्त्रसम्मतम् दक्षः शुचिः सत्यभाषी जित
निद्रो जितेन्द्रियः अप्रमत्तो निरालस्यः सेवाकृत्तो भवेन्न
रः प्रभुविश्वसमोमामस्वज्ञायाजननीधर्मामान्याल
द्धात्पवान्धवैस्तेरिहामुत्र सुखविस्तृभिः भर्तुर्मित्राणि मि
त्राणि जानीयात्तद्वैरीनरीन् सभीतिः सर्वदा तिष्ठेत्प्रभो
राज्ञां प्रतीक्षयन् अपमानेगटरुच्छिद्रे गुह्यमर्थं कथितं
वचन् भर्तुर्निरोकरं यत्नाद्गोपयेदतियत्नतः अलो
भः स्यात्स्वामिधने सदा स्वामिहिते रतः तत्स्त्रिधा

वसद्भावं क्रीडां हास्यं परित्यजेत् न पापमनसा पश्ये
द्यितं द्रव्यं हर्कि करी विविक्तशय्यां हास्यं च ताभिः स
ह विवर्जयेत् प्रभोः शय्यासनं यानं वसनं भाजना
नि च उपानद्भूषणं शास्त्रं नात्मार्थे विनियोजयेत् ल
ञ्जां कृतापराधेश्चेत् प्रार्थयेदग्रतः प्रभोः प्रागल्भ्यं प्रौ
ढवादं च सामान्याचारं विवर्जयेत् सर्वे वर्णाः स्वस्व
र्णैर्गोत्रोद्वाहं तथाशनम् कुर्वीरन् भैरवीचक्रात्त्व
चक्रादृते शिवे उभयत्र महेशानि शैवोद्वाहः प्रकीर्ति
तः तथा दानं च पाने च वर्णभेदो न विद्यते श्रीदेव्युवा
च किमिदं भैरवीचक्रं तत्त्वचक्रं च कीदृशम् तत्स
र्वं श्रोतुमिच्छामि कृपया वद मे प्रभो श्रीसदाशिव
उवाच कुलपूजाविधौ देवि चक्रानुष्ठानमीरितम् वि
शेषपूजासमये तत्कार्यं साधकोत्तमैः भैरवीचक्र
विषये न तादृङ् नियमः प्रिये यथासमयमासाद्य कु
र्याच्चक्रमिदं शुभम् विधानमस्य वक्ष्यामि साधका
नां शुभावहम् आराधिता येन देवी तूर्णं यच्छति वाञ्छि
तम् कुलाचार्यो रम्यभूमावास्तीर्य्यासनमुत्तमम्
कामाद्येनास्त्रबीजेन संशोध्योपविशेत्ततः सिन्दूरे
णाकुशीदेन केवलेन जलेन वा त्रिकोणं चतुरस्रं च म
ण्डलं च रचयेत् सुधीः विचित्रघटमानीय दध्यक्षतवि
राजितम् फलपल्लवसंयुक्तं सिन्दूरतिलकान्वितम्
सुवासितजलैः पूर्णं मण्डले तत्र साधकः प्रणवेन

तत्संस्थाप्य धूपदीपौ प्रदर्शयेत् संपूज्य गन्धपुष्पा
भ्यां चिंतयेदिष्टदेवताम् सतैपूजाविधिना तत्र यू
जां समाचरेत् विशेषमत्र वक्ष्यामि शृणुष्वामरवन्दिते
गुर्वादिनवपात्राणां नात्र स्थापनमिष्यते यथेष्टं तत्त्व
मादाय संस्थाप्य पुरतो व्रती प्रोक्षयेदस्त्रमंत्रेण दिव्य
दृष्ट्यावलोकयेत् अलियंत्रे गन्धपुष्पं दत्वा तत्र विचि
न्तयेत् आनन्दभैरवीं देवीमानन्दभैरवं तथा नवयौ
वनसंपन्नां तरुणारुणविग्रहाम् चारुहासामृतो
द्भासोल्लसद्वदनपंकजाम् नृत्यगीतकृतामोदां नाना
भरणभूषिताम् विचित्रवसनां ध्यायेद्वराभयकरा
म्बुजाम् इत्यानन्दमयीं ध्यात्वा स्मरेदानन्दभैरवम्
कर्पूरपूरधवलं कमलायताक्षं दिव्याम्बराभरणभू
षितदेहकान्तिम् वामेन पाणिकमलेन सुधाढ्यपा
त्रं दक्षेण शुद्धिगुटिकां दधतं स्मरामि ध्यात्वैवमुभयं
तत्र सामरस्यं विचिन्तयन् प्रणवादिनमोऽन्तेन नाम
मंत्रेण देशिकः संपूज्य गन्धपुष्पाभ्यां शोधयेत् कार
णं ततः पाशादित्रिकबीजेन स्वाहान्तेन कुलार्चकः
अष्टोत्तरशतावृत्त्या जपन् हेतुं विशोधयेत् गृहका
मैकचित्तानां गृहिणां प्रबले कलौ आद्यतत्त्वप्र
तिनिधौ विधेयं मधुरत्रयम्॥

॥ ॥

॥ ॥ ॥

दुग्धंसितामाक्षिकंचविज्ञेयंमधुरत्रयम् अलिरूपमि
दंमत्वादेवतायैनिवेदयेत् स्वभावात्कलिजन्मा
नःकामविभ्रान्तचेतसः तद्रूपेन नजानन्तिशक्तिंसा
मान्यबुद्धयः अतस्तेषांप्रतिनिधौशेषतत्त्वस्यपार्वति
ध्यानंदेव्याःपदाम्भोजेइष्टमन्त्रजपस्तथा ततस्तुप्र
मतत्त्वानिपललादीनियानिच प्रत्येकशस्तथानेनमनु
नाचाभिमन्त्रयेत् सर्वंब्रह्ममयंध्यात्वानिमील्यनयनद्व
यम् निवेद्यपूर्ववत्कालेपानभोजनमाचरेत् इदंतु
भैरवीचक्रंसर्वतन्त्रेषुगोपितम् नवाच्यंकथितंभद्रेसा
रात्सारंपरात्परम् विवाहोभैरवीचक्रेतत्त्वचक्रेपि
पार्वति सर्वथासाधकेन्द्रेणकर्त्तव्यःशैववर्त्मना विना
परिणयंवीरःशक्तिसेवांसमाचरन् परस्त्रीगामिना
पापंप्राप्नुयान्नात्रसंशयः सम्प्राप्तेभैरवीचक्रेसर्वेव
र्णाद्विजोत्तमाः निवृत्तेभैरवीचक्रेसर्वेवर्णाःपृथक्
पृथक् नात्रजातिविचारोस्तिनोच्छिष्टादिविवेचनम्
चक्रमध्यगतावीराममरूपानचान्यथा नदेशकाल
नियमोनवापात्रविचारणे येनकेनाहृतंद्रव्यंचक्रेऽ
स्मिन्विनियोजयेत् दूरदेशात्समानीतंपक्वंवापक्व
मेववा वीरेणपशुनावापिचक्रमध्यगतंशुचिः चक्रा
रम्भेमहेशानिविघ्नाःसर्वेभयाकुलाः विभीतास्तेप
लायन्तेवीराणांब्रह्मतेजसा पिशाचागुह्यकायक्षावेता
लाःक्रूरजातयः श्रुत्वात्रभैरवीचक्रंदूरंगच्छन्तिसाधसे

म: नि तं ४३

43

तत्रतीर्थानिसर्वाणिमहातीर्थादिकानिच सेन्द्रामर
गणाःसर्वेतत्रागच्छंतिसादरम् चक्रस्थानेमहातीर्थे
सर्वतीर्थाधिकेशिवे त्रिदशायत्रवांछंतितवनैवेद्य
मुत्तमम् म्लेछेनश्वपचेनापिकिरातेनापिहूणेना
श्रामेपक्वंयदानीतंवीरहस्तार्पितंशुचि दृष्ट्वातंभैरवी
चक्रेममरूपांश्चसाधकान् मुच्यंतेपापपाशेभ्यःका
लिकल्मषदूषिताः प्रबलेकलिकालेतुनकुर्याच्चक्र
गोपनम् सर्वत्रसर्वदावीरःसाधयेत्कुलसाधनम्
चक्रमध्येवृथालापंचांचल्यंबहुभाषणं निष्ठीवनम्
धोवायुंवर्णभेदंविवर्जयेत् क्रूरान्खलान्पशून्पा
पान्नास्तिकानकुलदूषकान् निंदकानकुलशास्त्रा
णांचक्राद्दूरतरंत्यजेत् स्नेहाद्भयादनुरक्त्यापशुंच
क्रेप्रवेशयन् कुलधर्मात्परिभ्रष्टोवीरोऽपिनरकं
व्रजेत् ब्राह्मणाःक्षत्रियावैश्याःशूद्राःसामान्यजातयः
कुलधर्माश्रितायेवैपूज्यास्तेदेववत्सदा वर्णाभिमा
नाच्चक्रेतुवर्णभेदंकरोतियः सयातिघोरंनिरयमपि
वेदांतपारगः चक्रांतर्गतकौलानांसाधूनांशुद्धचेत
साम् साक्षाच्छिवस्वरूपाणांपापशंकाभवेत्कुतः या
वद्वसंतिचक्रेषुविप्राद्याःशैवमार्गिणः तावत्तेशाम्भ
वाचाराश्चरेयुः शिवशासनात् चक्राद्विनिःसृताःस
र्वेस्वस्ववर्णाश्रमोदितम् लोकयात्राप्रसिद्ध्यर्थंकुर्युः
कर्मपृथक्पृथक् पुरश्चर्याशतेनापिशवमुण्डचि

तास्वनात् चक्रमध्ये समुत्पन्नात् तत्फलं लभते सु
धीः भैरवीचक्रमाहात्म्यं को वा वक्तुं क्षमो भवेत् सकृ
देतत्प्रकुर्वाणः सर्वैः पापैः प्रमुच्यते षण्मासे भूमि
पालः स्याद्वर्षे मृत्युञ्जयः स्वयम् नित्यं समाचरन् म
र्त्यो ब्रह्मनिर्वाणमाप्नुयात् वहुना किमिहोक्तेन सत्यं
जानीहि कालिके इहामुत्र सुखावाप्त्यै कुलमार्गो हि ना
परः कलेः प्रावल्यसमये सर्वधर्मविवर्जिते गोपना
त्कुलधर्मस्य कौलोऽपि नारकी भवेत् कथितं भैरवी
चक्रं भोगमोक्षैकसाधनम् तत्त्वचक्रं कुलेशानि साम्प्र
तं वच्मि तच्छृणु तत्त्वचक्रं चक्रराजं दिव्यचक्रं तदुच्य
ते नात्राधिकारः सर्वेषां ब्रह्मज्ञानसाधकान्विना परब्र
ह्मोपासका ये ब्रह्मज्ञा ब्रह्मतत्पराः शुद्धान्तःकरणाः
शान्ताः सर्वप्राणिहिते रताः निर्विकारा निर्विकल्पा दया
शीला दृढव्रताः सत्यसंकल्पका ब्राह्मा·स्त·एवात्राधि
कारिणः ब्रह्मभावेन तत्त्वज्ञा ये पश्यन्ति चराचरम् तेषां
तत्त्वविदां पुंसां तत्त्वचक्रेऽधिकारिता सर्वं ब्रह्ममयं भा
वश्चक्रेऽस्मिंस्तत्त्वसंज्ञके येषामुत्पद्यते देवि त एव तत्त्व
चक्रिणः न घटस्थापना नात्रास्ति च वाहुल्येन पूजनम् स
र्वत्र ब्रह्मभावेन साधयेत्तत्त्वसाधनम् ब्रह्ममन्त्री ब्रह्म
निष्ठो भवेच्चक्रेश्वरः प्रिये ब्रह्मज्ञैः साधकैः सार्द्धं तत्त्वचक्रं
समारभेत् रम्ये सुनिर्मले देशे साधकानां सुखावहे
विचित्रासनमानीय कल्पयेद्विमलासनम् तत्रोपविश्य

म॰
नि॰ त
४४

44

चक्रेशः सहितो ब्रह्मसाधकैः आसाद्ययेनतत्वानिस्था
पयेदग्रतः शिवे तारादिप्राणवीजांतेशतावृत्याजपन्
मनुम् सर्वतत्वेषुचक्रेश इमं मंत्रमुदीरयेत् ब्रह्मार्प
णंब्रह्महविर्ब्रह्माग्नौब्रह्मणाहुतम् ब्रह्मैव तेनगंत
व्यंब्रह्मकर्मसमाधिनासप्तधावात्रिधाजप्त्वातानिस
र्वाणिशोधयेत् ततोब्राह्मेणमनुनासमर्प्यपरमात्मने
ब्रह्मज्ञैःसाधकैःसार्द्धं विदध्यात्पानभोजनम् ब्रह्मच
क्रेमहेशानिवर्णभेदंविवर्जयेत् नदेशकालनियमोन
पात्रनियमस्तथा येकुर्वंतिनराम्मूढादिव्यचक्रेप्रमादतः
कुलभेदंवर्णभेदंतेगच्छंत्यधमांगतिम् अतःसर्वप्रयत्ने
नब्रह्मज्ञैःसाधकोत्तमैः तत्वचक्रमनुष्ठेयंधर्मकामार्थ
मुक्तये॥ श्रीदेव्युवाच गृहस्थानामशेषेणधर्मान्कथ
त्प्रभो संन्यासविहितान्धर्मान्कृपयावक्तुमर्हसि
श्रीसदाशिवउवाच अवधूताश्रमोदेविकलौसंन्यासउच्यते
विधिनायेनकर्त्तव्यस्तत्सर्वंशृणुसाम्प्रतं ब्रह्मज्ञानेसमु
त्पन्नेविरतेसर्वकर्म्मणि अध्यात्मविद्यानिपुणःसंन्यासाश्र
ममाश्रयेत् विहायवृद्धौपितरौशिशुंभार्य्यांपतिव्रतां
त्यक्त्वासमर्थान्बन्धून्प्रव्रजन्नारकीभवेत् ब्राह्मणःक्ष
त्रियोवैश्यःशूद्रःसामान्यएवच कुलावधूतसंस्कारेपंचा
नामधिकारिता सम्पाद्यगृहकर्म्माणिपरितोष्यपरानपि
निर्म्ममोनिलयाद्गच्छेन्निष्कामोविजितेन्द्रियः आहूय
स्वजनान्वन्धून्ग्रामस्थान्प्रतिवासिनः ॥ ॥

श्रीमान मतिमच्चिक्षेद्गृहाज्जिगमिषुर्जनः तेषामनु
ज्ञामादाय प्रणम्य परदेवताम् ग्रामं प्रदक्षिणीकृत्य
निरपेक्षो गृहादियात् मुक्तः संसारपाशेभ्यः परमान
न्दनिर्वृतः कुलावधूतं ब्रह्मज्ञं गत्वा संप्रार्थयेदिदम्
गृहाश्रमे परब्रह्मन् ममैतद्विगतं वयः प्रसादं कुरु
मे नाथ संन्यासग्रहणं प्रति निवृत्तगृहकर्म्माणं वि
चार्य विधिवद्गुरुः शान्तं विवेकिनं वीक्ष्य द्वितीयाश्र
ममादिशेत् ततः शिष्यः कृतस्नानो यतात्मा विहिता
ह्निकः ऋणत्रयविमुक्त्यर्थं देवर्षीन् तर्पयेत् पितॄन् दे
वा ब्रह्मा च विष्णुश्च रुद्रश्च सगणाः सह ऋषयः सन
काद्याश्च देवब्रह्मर्षयस्तथा अत्रेये पितरः पूज्यावस्या
भिश्रुतानपि पिता पितामहश्चैव प्रपितामह एव च
माता पितामही देवी तथैव प्रपितामही मातामहाद
योऽप्येवं मातामह्यादयोऽपि च प्राच्यां दर्षीन् यजेद्देवा
न् दक्षिणस्यां पितॄन् यजेत् मातामहान् प्रतीच्यां च प्र
जयेत् न्यासकर्म्मणि पूर्वादिक्रमतो दद्यादासनानां द्वये
द्वयम् देवादीन् क्रमतस्तत्रावाह्य पूजां समाचरेत् स
मर्च्य विधिवत्तेभ्यः पिण्डान् दद्यात् पृथक् पृथक् पिण्ड
प्रदानविधिना दत्वा पिण्डं यथाक्रमम् कृताञ्जलिपु
टो भूत्वा प्रार्थयेत् पितृदेवताः तृप्यन्तु पितरो देवा दे
वर्षिमातृकागणाः गुणातीतपदप्राप्तये मन्त्रणीकृता
श्चिमान् इत्यात्मपणमर्घयित्वा प्रणम्य च पुनः पुनः ऋण

द्वयविनिर्म्मुक्त आत्मश्राद्धं प्रकल्पयेत् पितामहस्यैव
सर्व्वेषां ततः पिता प्रपितामहः आत्मस्यात्मार्पणार्थाय
कुर्य्यादात्मक्रियां सुधीः उत्तराभिमुखो भूत्वा पूर्व्ववत्क
ल्पितासने आवाह्यात्मपितॄन् देवि दद्यात्पिण्डं समन्त्र
यन् प्रागग्रान् दक्षिणाग्रांश्च पश्चिमाग्रान् यथाक्रमात्
पिण्डार्थमास्तरेद्दर्भान् उदगग्रान् स्वकर्म्मणि समाप्य
श्राद्धकर्म्माणि गुरुदर्शितवर्त्मना शुद्धचित्तस्त्वथेमि
मंमंत्रशतं जपेत् ह्रीं त्र्यम्बकं यजामहे सुगन्धिं पुष्टिव
र्द्धनम् उर्व्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय मामृतात्
उपासनानुसारेण देव्या मण्डलपूर्व्वकम् संस्थाप्य क
लसं तत्र गुरुः पूजां समारभेत् ततस्तु परमं ब्रह्म ध्या
त्वा शाम्भववर्त्मना विधाय पूजां ब्रह्मज्ञो वह्निस्थापन
माचरेत् प्रागुक्तसंस्कृते वह्नौ स्वकल्पोक्ताहुतिं गुरुः
दत्वा शिष्यं समाहूय साकल्यं हावयेत्तनम् आदौ व्या
हृतिभिर्हुत्वा प्राणहोमं प्रकल्पयेत् प्राणापानौ समा
नश्चोदानव्यानौ च वायवः ततो होमं ततः कुर्य्याद्देहा
ध्यासमुक्तये पृथिवीसलिलं वह्निर्व्वायुराकाशमे
व च गन्धो रसश्च रूपं च स्पर्शः शब्दो यथाक्रमात् ततो
वाक्पाणिपादाश्च पायूपस्थौ ततः परम् श्रोत्रं त्वङ्न
यने जिह्वा घ्राणं बुद्धीन्द्रियाणि च मनोबुद्धिश्चित्तमहं
कारो देहजाः क्रियाः सर्व्वाणीन्द्रियकर्म्माणि प्राणक-
र्म्माणि यानि च एतानि मे पदान्ते च शुद्ध्यन्तां पदमुच्चरेत्

ह्रीं जेनिरहंविरजाविपाप्माभूयासंहिठः स्वाहा चत्व
रिंशतितत्वानिकर्म्माणिदेहिकानिच हुत्वाग्नौनि
क्षिपेद्देहंस्ततनवच्चिन्तयेत्ततः विभाव्यस्ततवत्का
येरहितंसर्वकर्म्मणा स्मरेत्ततपरंमंत्रब्रह्मयज्ञसूत्रे
सम्भवेत ऐंक्लींह्रंसइतिमंत्रेणस्कन्धाद्धुतार्थमंत्र
वित् यत्तसूत्रंकरेकृत्वापठित्वाव्याहृतित्रयम वह्नि
जायांसमुच्चार्य्यहुत्वाकमनलेक्षिपेत् हुत्वैवमुपवी
तेचकामवीजेसमुच्चरन् छित्वाशिखांकरेकृत्वाहु
तमध्येनियोजयेत ब्रह्मपुत्रिशिखेत्वेहिवालरूपा
तपस्विनी दीयतेपावकेस्थानेगच्छदेविनमोऽस्तु
तेकाममायांकूर्च्चंमंत्रंवह्निजायामुदीरयन् तस्मिन्
स्तेस्तुतेनवह्नौशिखांहोमंसमाचरेत शिखामात्रि
त्यपितत्तोदेवादेवर्षयस्तथा सर्वाण्याश्रमकर्म्मा
णिनिवसंतिशिखोपरि अतःसंतर्प्पिताःसर्वादेवर्षि
पितृदेवताः शिखासूत्रपरित्यागादेहीब्रह्ममयो
भवेत् यज्ञसूत्रशिखात्यागात्संन्यासःस्याद्द्विज
न्मनाम् शूद्राणांमितरेषांचशिखाहुत्वैवसंक्रिया
ततोमुक्तशिखासूत्रःप्रणमेद्दंडवद्गुरुम् गुरुरु
त्थापयेच्छिष्यंदत्वकर्णेवदेदिदम् तत्वमसिमहाप्रा
ज्ञहंसःसोऽहंविभावय निर्म्ममोनिरहंकारःस्वभा
वेनसुखंचर ततोचंदेचवह्निंचविसृज्यब्रह्मतत्ववि
तआत्मस्वरूपंतन्मत्वाप्रणमेच्छिरसागुरुं नमस्तथे

म·
नि·त
४९
96

नमोमह्यंतुभ्यंमह्यंनमोनमः त्वमेवतत्तत्त्वमेववि
श्वरूपनमोऽस्तुते ब्रह्ममन्त्रोपासकानांतत्त्वज्ञानां
जितात्मनाम् स्वमन्त्रेणशिखाच्छेदात्संन्यासग्रहणं
भवेत् ब्रह्मज्ञानविशुद्धानांकिंयज्ञैःश्राद्धपूजनैः स्वे
च्छाचारपराणांतुप्रत्यवायोनविद्यते ततोनिर्द्वन्द्वरू
पोऽसौनिष्कामःस्थिरमानसः विहरेत्स्वेच्छयाशिष्यः
साक्षाद्ब्रह्ममयोभुवि आब्रह्मस्तम्बपर्य्यन्तंसद्रूपेण
विभावयन् विस्मृत्यनामरूपाणिध्यायन्नात्मानमात्म
नि अनिकेतःक्षमावृत्तोनिःशङ्कःसङ्गवर्जितः निर्म
मोनिरहङ्कारःसंन्यासीविहरेत्क्षितौ मुक्तोविधिनि
षेधेभ्योनिर्योगक्षेम आत्मवित् सुखदुःखसमोधीरो
जितात्माविगतस्पृहः स्थिरात्माप्राप्तदुःखोऽपिसुखे
प्राप्तेऽपिनिस्पृहः सदानन्दःशुचिःशान्तोनिरपेक्षोनिरा
कुलःनोद्वेजकःस्याज्जीवानांसदाप्राणिहितेरतः वि
गतामर्षभीर्दान्तोनिःसंकल्पोनिरुद्यमः शोकद्वेष
विमुक्तःस्यात्शत्रौमित्रेसमोभवेत् शीतवातातपस
हःसमोमानापमानयोः समःशुभाशुभेतुष्टोयदृ
च्छाप्राप्तवस्तुना निस्त्रैगुण्योनिर्विकल्पोनिर्लोभः
स्यादसंचयी यथासत्सुपाश्रित्यसर्वंविश्वंप्रतिष्ठति
आत्मस्थितंतथादेहीजीवन्नेवंसुखीभवेत् इन्द्रिया
ण्येवकुर्वन्तिस्वंस्वंकर्मपृथक्पृथक् आत्मासाक्षीवि
निर्लिप्तोज्ञात्वैवंमोक्षभाग्भवेत् धातःप्रतिग्रहंनिन्दा

मन्तंक्रीडनेछिया रेतस्त्यागमसूयांच संभाषीय
विवर्जयेत् सर्वत्रसमदृष्टिःस्यात्कीटेदेवेतथान
रे सर्वंब्रह्मेतिजानीयात्परिवाट्सर्वकर्मसु वि
प्रान्नंश्वपचान्नंवायस्मात्तस्मात्समागतम् देशंकाल
तथापात्रमश्नीयादविचारयन् अध्यात्मशास्त्राध्या
यनैःसदातत्त्वविचारणैः अवधूतोनयेत्कालेस्व
च्छाचारपरायणः संन्यासिनांमृतेकायेदाहनंनक
दाचन संपूज्यगन्धपुष्पाद्यैर्निखनेद्वाप्सुमज्जयेत्
अप्राप्तयोगमर्त्यानांसदाकामाभिलाषिणाम् स्वभा
वाज्जायतेदेविप्रवृत्तिःकर्मसंकुले तत्रापितेसाधु
रक्षाध्यानाद्बीजपसाधने श्रेयस्तेदेवजानंततंत्रैवदृ
ढनिष्ठयाः अतःकर्मविधानानिप्रोक्तानिविलसु
इये नामरूपंवहुविधंतदर्थंकल्पितंमया ब्रह्म
ज्ञानादृतेदेविकर्मसंन्यसनेविनाकुर्वन्कल्पशते
कर्मनभवेन्मुक्तिभाग्जनः कुलावधूतस्तत्त्वज्ञोजी
वन्मुक्तोनराकृतिः साक्षान्नारायणंमत्वागृहस्थस्त
प्रपूजयेत् यतेर्दर्शनमात्रेणविमुक्तःसर्वपातका
त् तीर्थव्रततपोदानसर्वयज्ञफलंलभेत् इतिश्री
महानिर्वाणतंत्रेसर्वतंत्रोत्तमोत्तमेसर्वधर्मनिर्ण
यसारेश्रीमदाद्यासदाशिवसंवादेवर्णाश्रमाचारध
र्मकथनेनामाष्टमोल्लासः ८ नवमोल्लासः ।
सदाशिवउवाच वर्णाश्रमाचारधर्माःकथितास्तव

म॰
नि तं
४७

सूत्रेते संस्कारान्सर्ववर्णानां पृथक्पृथग्वदतो मम सं
स्कारेण विना देवि देहशुद्धिर्न जायते नासंस्कृतोऽ
धिकारी स्याद्दैवे पैत्रे च कर्म्मणि अतो विप्रादिभिर्व
र्णैः स्वस्ववर्णोक्तसंस्क्रियाः कर्त्तव्याः सर्वथा यत्नैरिहा
मुत्रहितप्सुभिः जीवसेकः पुंसवनं सीमन्तोन्नयनं
तथा जातनाम्नी निष्क्रमणं मन्नाशनमतः परम् चू
डोपनयनोद्वाहाः संस्काराः कथिता दश शूद्राणां सू
त्रभिन्नानामुद्वीतं न विद्यते तेषां नवैव संस्कारा द्विजा
तीनां दश स्मृताः नित्यानि सर्वकर्म्माणि तथा नैमित्ति
कानि च काम्यान्यपि वरारोहे कुर्य्याद्ब्राह्मवर्त्मना ·
यानि यानि विधानानि येषु येषु च कर्म्मसु पुरैव ब्रह्म
रूपेण तान्युक्तानि मया प्रिये संस्कारेषु च सर्वेषु त
थैवान्येषु कर्म्मसु विप्रादिवर्णभेदेषु क्रमान्मन्त्राश्च
दर्शिताः सत्यत्रेताद्वापरेषु तत्तत्कर्म्मसु कालिके
पूर्णवाग्यास्तु तान्मन्त्रान् प्रयोगेषु नियोजयेत् क
लौ तु परमेशानि तैरेव मनुभिर्नराः मायाद्यैः सर्वक
र्म्माणि कुर्य्युः शंकरशासनात् निगमागमतन्त्रेषु वे
देषु संहितासु च सर्वे मन्त्रा मयैवोक्ताः प्रयोगो युगभे
दतः कलावन्नगतप्राणाः मानवा हीनतेजसः तेषां
हिताय कल्याणि कुलधर्म्मो निरूपितः कलिजैर्बल
जीवानां प्रयासाशक्तचेतसाम् संस्कारादिक्रियास्ते
षां संक्षेपेणापि वक्ष्यते सर्वेषां शुभकार्य्याणामादिभू

ताकुशण्डिका तस्मदादौ प्रवक्ष्यामि शृणु त्वं देववन्दि
ते रम्ये परिष्कृते देशे तुषाङ्गारादिवर्जिते हस्तमात्र
प्रमाणेन स्थण्डिलं रचयेत् सुधीः तिस्रो रेखा विधात
व्या प्रागग्रास्तत्र मण्डले कुर्वेनाम्भुसततः सर्वा वह्निना
वह्निमाहरेत् आनीय वह्निं तत्पार्श्वे स्थापयेद्वागर्भवं
स्मरन् ततस्तस्माज्ज्वलद्दारुं गृहीत्वा दक्षपाणिना ह्रीं
क्रव्यादेभ्यो नमः स्वाहा क्रव्यादांशं परित्यजेत् इत्यप्र
तिष्ठिते वह्निं पाणिभ्यामात्मसंमुखम् उद्धृत्य तां स्मरेद्वा
ग्मायायोद्भवमिति स्मरन् संस्थाप्य तृणदारुभ्यां प्रज्व
लीकृत्य पावकम् समिधे द्वे हुतान्के च हुत्वा तस्मिन्
हुताशने स्वकर्मविहितेनाम कृत्वा ध्यायेदनेन यत्
बालार्कारुणसंकाशं सप्तजिह्वं हिमस्तकम् अजारूढं
शक्तियं जटामुकुटमण्डितम् ध्यात्वेवं प्राञ्जलिर्भूत्वा
वाहयेद्धव्यवाहनम् मायामेषोहिपद ततः सर्वमरवदे
तप्रिये हव्यवाहपदं तेव मुनिभिः स्वगणैः सह अपरे
रक्तरक्तेति नमः स्वाहा ततो वदेत् इमां वाग्नहव्यवा
हमयेतेयानिरुद्धरन् यथोपचारैः संपूज्य सप्तजि
ह्वाप्रपूजयेत् काली कपाली च मनोजवा च सुलोहिता
चैव सुधूम्रवर्णा स्फुलिङ्गिनी विश्वनिरूपिणी च लेला
यमानेति च सप्तजिह्वाः ततोऽग्नेः पूर्वमारभ्य सहकौ
लालपाणिना उत्तराग्रं महेष्वानि त्रिधा प्रोक्षणमाच
रेत् तथैव याम्यमारभ्य कौबेरान्तं हुताशितः त्रिधापञ्चु

लणं कुर्य्यात्ततो यज्ञीयवस्तुनः परिस्तरेत्ततो दर्भैः पूर्वा-
स्माद्दुत्तरावधि उदकसंस्थैः क्रमशो ऽग्रैः प्रागग्रैरन्यदिक्स्थि-
तैः अग्निं दक्षिणतः कृत्वा गत्वा ब्रह्मासनान्तिकम् वामांगु-
ष्ठकनिष्ठाभ्यां ब्रह्माणीं कल्पितासनात् गृहीत्वा कुशप-
त्रैकं ह्रीं निरस्तः परावसुः इत्युक्त्वाग्रे ईशानस्यां निक्षिपे-
दुत्करादिना सीदा यज्ञापते ब्रह्मविदन्तेन कल्पितासन-
म् सीदामीति वदन् ब्रह्मा विशेत्तत्रोत्तराभुवः संपूज्य
गन्धपुष्पाद्यैर्ब्रह्माणं प्रार्थयेदिदम् गोपायस्व यज्ञं यज्ञे
शयज्ञं पाहि ह्रुं ह्रुं स्पेत माच यज्ञपतिं पाहि कर्मसाक्षि
न्नमोऽस्तु ते गोपयामि वदेद्ब्रह्मा ब्रह्माभावे स्वयं वदे-
त् तत्र दर्भमयं विप्रं कल्पयेद्यज्ञसिद्धये ततो ब्रह्म
न्निहागच्छागच्छेमा वासु साधकः पाद्यादिभिश्च संपू-
ज्य यावद्यज्ञसमापनम् तावद्भवद्भिः स्थातव्यमिति
प्रार्थ्य नमेत्ततः सोदकेन करेणाग्रे ईशानाद्ब्रह्मणो
ऽन्तिकम् त्रिधा पर्युक्ष्य वह्निं वत्रिः प्रोक्षयेत्तदनन्तरम् अ-
गस्त्यवर्त्मना तेन सूप विष्टपनिजासने स्थाण्डिलस्यान्त-
रे दर्भानुदगग्रान् परिस्तरेत् तेषु यज्ञीयवस्तूनि सर्व-
शः सादयेत्सुधीः सोदकं प्रोक्षणीपात्रमाज्यस्थाली
समित्कुशान आसादयेत् स्रुक्स्रुवादीनि ह्रां ह्रीं ह्रुमिति
मन्त्रकैः दिव्यदृष्ट्या प्रोक्षणेन संस्कृत्य तदनन्तरम् पवि-
त्रादक्षिणे जानु पातयित्वा स्रुवे स्रुवा हुतमादाय मति-
मान्स्थितयन्त्रहितमात्मनः ह्रौं विच्चे हृत्कं तेन प्रदद्या

हुतित्रयम् तथैव हुतमादाय ध्यायन देवं प्रजापतिं
वायव्यादग्निकोणांतः जुहुयादाज्यधारया पुनराज्यस
मादाय ध्यायन् देवं पुरन्दरम् नैर्ऋतादीशकोणांतं ज
हुयादाज्यधारया ततोऽग्न्युत्तरेयाम्यमध्ये च परमेष्ठि
ति अग्निसोमअग्नीसोमौ समुल्लिख्य यथाक्रमात् स्व
र्णीन मोऽन्त्येन मायायेनाहुतित्रयम् हुत्वा विधेयक
र्माकं होमं कुर्यादिह चतत्रः आहुतित्रयदानं तथागाहो
मं प्रचक्षते यदुद्दिश्याहुतिं दद्यात् देयो देशोऽपि तत्क
ते समाप्य प्रकृतं कर्म स्विष्टिकृद्धोममाचरेत् प्रायश्चि
तात्मको होमः कलौ नास्ति वरानने स्विष्टिकृत्याहुति
भिः प्रायश्चित्तं विधीयते पूर्ववद्यावितादाय ब्रह्माणम
नुस्मरन् अस्मिन् कर्मणि देवेश प्रमादाद्गमतोऽपि
वा न्यूनाधिकं कृतं यच्च सर्वं स्विष्टिकृते कुरु मायाद्ये
नामुना देवि स्वाहान्तेनाहुतिं हुनेत् त्वमग्ने सर्वलोका
नां पावनः स्विष्टिकृत् प्रभुः यजमानादीन्तेमकर्तासर्वान्
कामान् प्रपूरय अनेन स्ववंनं कुर्यान् मायया च ह्निजा
यया इत्ये स्विष्टिकृते होमं समाप्य क्रतुसाधकः कर्म
णः स्वपरब्रह्मत्वयुक्ते विहितं च यत् तच्छांतये जुहुस
म्यस्ते व्याहृत्या हूयते विभो मायादि वह्निजायांते भूर्भुवः
स्वरिति त्रिभिः आहुतित्रितयं दद्यात् त्रितयेन तथैव च
हुत्वाग्नौ यजमानेन दद्यात् पूर्णाहुतिं बुधः स्वयं चेत् क
र्मकर्तास्यात् स्वयमेवाहुतिं क्षिपेत् अभिषेकविधानं

म॰
वि तं॰
४९

49

नामेवमेवविधिःस्मृतः आद्येमायांसमुत्पाद्यततोय
ज्ञपतेवदेत् पूर्णोभवतुयज्ञोमेस्फुष्यन्तुयज्ञदेवताः फ
लानिसम्प्रयच्छन्तुवह्निकान्तावधिर्म्मतुः मंत्रेणाने
नमतिमानुत्थायसुसमाहितः फललतामूलसहिताहु
तिंदद्याद्धुताशनेदत्तपूर्णाहुतिर्विद्वान्शान्तिकर्म्मस
माचरेत् प्रोक्षणीपात्रतोयेनकुशैःसन्मार्जयेद्विजः
आपःसुमित्रियाःसंतुममवैताःषययोमम आपोरत्नेन
मानित्यमापोनारायणःस्वयम् आपोहिष्ठामयोभुवस्ता
नऊर्जेदधातनः इत्यामंत्र्यमार्ज्जनेनकृत्वाभूमौविन्दून्वि
निक्षिपेत् यद्विषंतिचमांनित्यंयाश्चद्विष्मोनरानवयम्
आपोहस्मिंस्त्रियाल्लेषांसंतुभस्मतेनतानपि अनेनेशान
दिग्भागेविन्दून्प्रक्षिप्यतान्प्रतिष्ठतान्कुशान्
हित्वाकृतांजलिर्भूत्वाप्रार्थयेद्धव्यवाहनम् बुद्धिंवियं
वलंमेधांप्रज्ञांश्रद्धांयशःश्रियम् आरोग्यंतेजआयुष्यं
देहिमेहव्यवाहन॥ इतिप्रार्थ्यवीतिहोत्रंविसर्जयेदमुं
नाशिवे यज्ञंयज्ञपतिंगच्छ यज्ञंगच्छहुताशन स्वांयो
निंगच्छयज्ञेशपूरयास्मन्मनोरथम् अग्नेत्वंमस्वस्वाहे
तिमंत्रेणाग्नेरुद्रदिशि दत्वाद्यहुतिवह्निंदक्षिण
स्यांविचालयेत् ब्रह्मणेदक्षिणांदत्वाभक्त्यानत्वाविस
र्जयेत् ततस्तिलकंकुर्यात्स्रुवंसंलग्नभस्मनामा
यांकामंसमुत्पाद्यसर्वशांतिकरंभव ललाटेतिलकंकु
र्यान्मंत्रेणानेनवाग्निकः शांतिरस्तुशिवंचास्तुवासवा

ग्निरुमात्ततः मरुतो ब्रह्मणश्चैव वसुरुद्रप्रजापतेः अ
नेनमन्त्रेणाघृष्येधारयन्मस्तकोपरि स्वशाखयाद्दक्षि
णाद्दद्यात् होमप्रकृतकर्मणः इति ते कथिता देवि
सर्वकर्मकुशण्डिका अथोत्याशुभकर्मादौ यत्नतः कु
लसाधकैः प्रकृतेकर्माणि शिवे चरुर्येषां कुलागमः
सिद्ध्यर्थकर्मणांतेषां चरुकर्मनिगद्यते चरुस्थाली
प्रकर्तव्या ताम्री वा मृत्तिकोद्भवा कुशण्डिकोक्तविधि
नाद्रव्यसंस्करणावधि कृत्वा कर्म चरुस्थालीमानये
दात्मसम्मुखे घृततामत्रेणाहष्टप्रादेशपरिमाणकं
पवित्रकुशमेकंच स्थालीमध्ये नियोजयेत् आनीयत
ण्डुलांस्तत्र संस्थाप्य स्थण्डिलान्तिके यस्मिन्कर्मणि
ये देवाः पूजनीयाः स्वराचिते तत्तन्नामचतुर्थ्यन्तमुक्
त्वाजद्यमीरयन् गृह्णामि निर्वपामीति प्रोतया मिक्रमा
द्दृदन् गृहीतान्निर्वपेत्स्थाल्यां प्रोतयेज्जलबिन्दुना प्र
सेकं च ततो मुष्टीन् देवमुद्दिश्य तण्डुलान् ततोङ्गु
सितांश्चैव दत्वा पाकविधानतः स्वपचेत्समलेन वह्नि
नावधानेन सम्वृते स्वपक्केको मलं ज्वालाद्दद्यात्तद्ध्रु
तस्रुवम् प्रत्येकं मरतः पात्रे विनिधाय कुशोपरि पुन
स्तिधाहृतेदग्ना स्थालीमाच्छादयेत्कुशैः ततः स्रुवे
चरुस्थाल्यां हुतयारणपूर्वकम् किंचिच्चरुं समादाय जा
तुहोमं समाचरेत् यागहोमं ततः कृत्वा प्रधानीभूत
कर्माणि यत्रयेविहिता देवास्तन्मन्त्रेणाहुतिं हुनेत् समा

म॰
नि॰ तं॰
५॰
50

प्यप्रकृते होमं स्विष्टकृद्धोमपूर्व्वकम् प्रायश्चित्तात्मकं
हुत्वा कुर्यात्कर्म्मसमापनम् संस्कारेषु प्रतिष्ठासु वि
धिरेष प्रकीर्त्तितः विधेयः शुभकर्म्मादौ कर्म्मसंसिद्धि
हेतवे अथोच्यते महामाये गर्भाधानोदिताः क्रियाः तत्रा
दौ ऋतुसंस्कारः कथ्यते कमले शृणु कृतनित्यक्रियः
शुद्धः पंचदेवान् समर्च्चयेत् ब्रह्मदुर्गागणेशाश्च ग्रहादि
कपतयस्तथा स्थण्डिले सैन्द्रदिग्भागे घटे देवान् प्रपू
जयेत् ततस्तु मातृकाः पूज्या गौर्याद्याः षोडश क्रमात्
गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा
स्वाहा शांतिः पुष्टिर्धृतिः क्षमा आत्मनो देवता चैव तथैव
कुलदेवताः आयान्तु मातरः सर्वास्त्रिदशानन्दकारिकाः
विवाहव्रतयज्ञानां सर्वाभीष्टप्रकल्पतान् यानशक्ति
समारूढाः सौम्यमूर्त्तिधराः सदा आयान्तु मातरः सर्वाय
त्रात्र सवसन्धये इमा वा मातृगणान् स्वशाखापरि
पूज्यैव देहल्यां नाभिमात्रायां प्रादेशपरिमाणतः सप्त
वा पंच वा विन्दून् दद्यात् सिन्दूरचन्दनैः प्रत्येकं विंदुमति
मान् कामं मायां रमां स्मरन् घृतधारां मविच्छिन्नां दद्या
त्तत्र वसोर्यजेत् वसुधारां प्रकल्प्यैवं मर्यादि केनैव कर्म्म
ना विरच्य स्थण्डिलं धीरो वह्निस्थापनपूर्व्वकम् होमद्र
व्याणि संस्कृत्य पचेच्चरुमनन्तरम् प्राजापत्यश्चरुस्त्वा
त्र वा पुनामाहुतानाशनः समाप्य धारां होमान्ते कृत्यमार्त्त
वमारभेत् ह्रीं प्रजापतये स्वाहा वह्नौ वाहुतित्रयम् प्र

दोयेकाहतिदयादिमंमेत्रमुदीरयन् विसुर्योनिंक
ल्पयतुत्वष्टारूपाणिपिंशतु आसिंचतुप्रजापतिर्धा
तागर्भंदधातते आग्नेनवरुणावापिसाज्येनवरुणा
पिवा सूर्य्यंप्रजापतिंविस्नुध्यायन्नाहुतिमुत्सृजेत्
गर्भंधेहिसिनीवालीगर्भंधेहिसरस्वती गर्भंतेअश्वि
नौदेवावाधत्तांपुष्करस्रजौ ध्यात्वादेवींसिनीवालींसर
स्वत्यश्विनौतथा स्वाहांतमन्त्रनानेनदद्यादाहुतिमुत्त
माम् ततःकामवधूमाधोरमोकुर्द्दसमुद्धरेत् आपु
ष्पेपुत्रकामायैगर्भमाधेहिसद्विधम् उल्काध्यात्वार
विंविस्रजहुयात्संस्कृतेऽनले यथेयंपृथिवीदेवी
हूतानामागर्भमादधे तथात्वंगर्भमाधेहिदशमेमा
सिसूतये स्वाहांतेनामुनाविस्नुंध्यायन्नाहुतिमाचरेत्
पुनराज्यसमादायध्यात्वाविस्नुपरात्परम् विस्नोर्ज्ये
ष्ठेनरूपेणनार्य्यामस्यांवरीयसम् सुतमाधेहि ठद्वद्
मुक्ताचहोहविसृजेत् क्रामन्तुपुटितामायांमायपाश
टितांवपून् पुनःकामेवमायांचपठित्वास्यांशिरः
स्पृशेत्पतिपुत्रवतीभिश्चनारीभिःपरिवेष्टितः शि
रश्चालभ्यहस्ताभ्यांवधाःक्रोडेचलेपतिः विस्नुर्गी
वित्रिसूर्य्यंध्यात्वादद्यात्फलत्रयम् ततःस्विष्टकृतंहु
त्वाप्रायश्चित्तमाससमापयेत् यद्वाप्रदोषसमयेगौरीशंक
रपूजनात् भास्करार्घ्यप्रदानाद्वदम्पत्योःशोधनंभवे
त् आर्त्तवंकथितंकर्म्मगर्भाधानमथोच्यते नद्वाद्वावम

म· नि· तं· ५१
51

गेत्रो वायुरमायोनिशिभार्य्याया सदानाम्पेतरं गत्वाथा
त्वादेवं प्रजापतिम् स्पृशन् पत्नीपीठेद्रमीमायावीजपु
रःसरम् श्रावयेः स प्रजायेत्वं शश्वेसुभकरीभव आकृष्य
भार्य्यां शय्यां प्राङ्मुखो वाप्युदङ्मुखः उपविश्य पश्चि
ये पश्यन् हस्तमाधाय मस्तके वामेन पाणिमालिंग्यस्था
नेस्थाने मन्त्रं जपेत् शीर्षे कामेश तेजस्त्वा चिबुके वाग्
भवे शतम् कंठे रमां विंशतिधा स्तन द्वन्द्वे शतं शता हृ
दये दशधा माया नाभौ तां पंचविंशतिम् जघ्नायोनौ क
ं दत्वा कामेन सह वाग्भवं शतमष्टोत्तरं जप्त्वा लिंगेः
प्येवं समाचरन् विकाशयमायया योनिं लिंगं यं गच्छेत्
सतामये रेतः सम्पातसमये ध्यात्वा विस्रष्टुं ततपतिः ना
भेरधस्तात् चित्कुण्डे रक्तिकायां प्रपातयेत् शुक्रमेका
न्ते रे विद्य निमं मंत्रमुदीरयेत् यथाग्निना सगर्भा भूर्योथि
या वज्रधारिणा वायुना दिग्गर्भवती तथा गर्भवती
भव जाते गर्भेऽस्तै तस्मिन्नस्मिन् वा मासे द्वितीये स्त्री
ये गर्भमासेन्न चरेत् पुंसवनं गृही कृत नित्यक्रियो भ
क्तो पंचदेवान् समर्चयेत् गौर्य्यादिमातृकाश्चैव वसोर्धा
रां प्रकल्पयेत् वृद्धिश्राद्धं ततः कृत्वा पूर्वोक्तविधिना
सुधीः याग होमं समापय्य कुर्यात् पुंसवनक्रियाम्
प्रजापतस्य फलत्रयं वन्दनामा हुताशनः गवोदधि यवं चै
कं देवि माषाव पिनि क्षिपेत् पतिः पृच्छेत् स्त्रियं भद्रे किं त्व
पिबसि त्रिःकृतम् ततः सीमन्तिनी ब्रूयात् मया पुंसवनं त्रि

या प्रसूती स्त्री न पिबेन्नारी यवमाषश्रुतं दधि जीवत्
सुताभिर्वनिताभिर्या गत्वा तेन समानयेत् संस्थाप्य वाम
भागे तां वा कृत्वा होमं समाचरेत् पूर्ववद्वह्निमादाय मायां
कूर्च्चं समुच्चरन् ये गर्भविघ्नकर्त्तारो ये च गर्भविनाश-
काः भूताः प्रेताः पिशाचाश्च वेतालाः बालघातकाः ता
न् सर्वान् नाशय हन्हुं गर्भरक्षां कुरु द्विठः मंत्रेणाने
न रक्षां च विताथि वा हुताशनम् रुद्रं प्रजापतिं ध्याय
न् प्रदद्याद् द्वादशाहुतीः ततो मायाचन्द्रमसे स्वाहे
त्याहुतिपंचकम् दत्वा भार्य्यां हृदि स्पृष्ट्वा मायां लक्ष्मी
शतं जपेत् ततः स्विष्टिकृतं हुत्वा प्रायश्चित्तं समापये
त् ततस्तु पंचमे मासि दद्यात् पंचामृतं स्त्रियै शर्कराम
धुक्षीरं च घृतं दधि समांशकम् पंचामृतमिदं प्रोक्तं दे
हशुद्धौ विधीयते वाग्भवं मदनं लक्ष्मीं मायां कूर्च्चं पु
रन्दरम् पंचद्रव्योपरि शिवं प्रजप्य पंच पंचधा एकी
कृत्यामृतान्यत्र प्राशयेद् दयितां पतिः सीमंतोन्नयनं
कुर्य्यान्मासि षष्ठे ऽष्टमे ऽपि वा यावन्न जायते ऽपत्यं ता
वत्सीमंतनक्रिया पूर्वोक्तधाराहोमान्तं कर्म कृत्वा
स्त्रिया सह उपविष्टासने प्राज्ञः प्रदद्यादाहुतित्रयम्
विश्वेभास्वते धात्रे वह्निजायां समुच्चरन् ततश्चन्द्रम
से ध्यात्वा शिवनाम्नि हुताशने सप्तधा हवनं कुर्य्यात्
सोममुद्दिश्य मानवः अश्विनीवासवे विश्वाशी वेदुर्गी
प्रजापतिम् ध्यात्वा प्रत्येकं तो दद्यादाहुतीः पंचधाशि

म॰
नि॰ तं॰
५२

52

वे स्वर्णकंकतिकां भर्त्ता गृहीत्वा दक्षिणे करे सीमंतादू
र्द्ध्वकेशांतं केशपाशे निवेशयेत् शिवं विस्नुं विरिंचिं ध्यायन्
मायावीजं समुच्चरन् भार्य्यां कल्याणि सुभगे दशमे मासि
सुवते सुप्रसूता भव प्रीता प्रसादाद्विघ्नकर्म्मणः आयु
ष्मती कंकतिकां वक्षसी नेस्तु भं कुरु ततः समापयेत्क
र्म्म स्विष्टिकृद्दवनादिभिः जातमात्रसुते दृष्ट्वा दत्वा स्व
र्णं गृहांतरे पूर्वोक्तविधिना धीरो धाराहोमं समापये
त् ततः पंचाहुतीर्दद्यात् अग्निमिंद्रप्रजापतिम् विश्वा
न्देवांश्च ब्रह्माणमुद्दिश्य तदनंतरम् मधुसर्पिःकांस्य
पात्रे समानीय समांशकम् वाग्भवेशतधा जप्त्वा प्रा
शयेत्तनयं पिता दत्तहस्तानामिकया मंत्रमेनं समुच्च
रन् आयुर्वर्च्चो बलं मेधां वर्द्धतां ते सदा शिशो इत्यामुक्ते
न नेकृत्वा गुप्तं नाम प्रकल्पयेत् कृतोपनयने पुत्रे तेन
नाम्ना समाह्वयेत् प्रायश्चित्तादिकं कृत्वा जातकर्म्म स
मापयेत् नालच्छेदं ततो धात्री कुर्य्यादुत्साहपूर्वकं
यावन्न छिद्यते नालं तावच्छौचं न वाप्यते प्रागेव नाडि
काच्छेदाद्देवीपैत्रीक्रियाचरेत् कुमार्य्याश्चापि कर्त्तव्या
मेवमेवममंत्रकम् षष्ठे वा चाष्टमे मासि नाम कुर्य्या
त्प्रकाशतः स्नापयित्वा शिशुं माता परिधायाम्बरे शु
भे भर्त्तुः पार्श्वं समागम्य प्राङ्मुखं स्थापयेत्सुतं अभि
षेकं च शिशोर्म्मूर्द्धिणि सहिरण्यकुशोदकैः जाह्नवीय
मुनारेवासुपवित्रासरस्वती नर्म्मदावरदाकुंतीसाग

गाश्चसर्वांसिव एतैस्त्वामभिषिंचंतुधर्मकामार्थसि
द्धये ॐ ह्रीं आपोहिष्ठामयोभुवस्तानऊर्जे दधातन
महेरणायचक्षसे ॐ योवःशिवतमोरसस्तस्यभाज
यतेहनउशतीरिवमातरः ॐ तस्माअरंगमामवोय
स्यक्षयायजिन्वथ आपोजनयथाचनः अभिषिच्यत्रि
भिर्मंत्रैःपूर्ववद्वह्निसंस्क्रियाम् कृत्वासम्यग्यथारी
तिदद्यात्पंचाहुतीःसुधीः अग्नयेप्रथमांदत्त्वावासवा
यततःपरम् ततःप्रजानाम्पतयेविश्वदेवेभ्यएवच
ब्राह्मणेचाहुतिंदद्याद्वह्नौपार्थिवसंज्ञके ततोऽक्षे
त्रमादायश्रावयेद्दक्षिणश्रुतौ स्वल्पांतरंसगोत्रा
र्थंशुभंनामविचक्षणः श्रावयित्वाद्वियानामब्राह्म
णेभ्योनिवेदयेच ततःसमापयेत्कर्मकृत्वास्विष्टिकृ
दादिकम् कन्यायानिष्क्रमोनास्तिवृद्धिश्राद्धंनविद्यते
नामान्नप्राशनेचूडांकुर्याद्धीमानमंत्रकम् चतुर्थे
मासिषष्ठेवाकुर्यान्निष्क्रमणंशिशोः कृतनित्यक्रियः
स्नातःसम्पूज्यगणनायकम् स्नापयित्वाततनयंच
स्त्रालंकारभूषितम् संस्थाप्यपुरतोविद्वानिमंमंत्र
मुदीरयेत् ब्रह्माविष्णुशिवोदुर्गागणेशोभास्करस्त
थाइन्द्रोवायुःकुबेरश्चवरुणोऽग्निर्बृहस्पतिः शिशोः
शुभंप्रकुर्वंतुरक्षंतुपथिसर्वदा इत्युक्त्वाकेसमादाय
गीतवाद्यपुरःसरम् वहिर्निष्क्रामयेद्बालंसानंदैः
स्वजनैःसह गत्वाध्वनिकियद्दूरंशिशुंसूर्यंनिरीक्षयेत

ॐ ह्रीं तच्चक्षुर्देवहितं पुरस्तात् शुक्रमुच्चरत् पश्येम
शारदः शतं जीवेम शारदः शतम् इत्यादिमंदर्शयित्वा
समागम्य निजालयम् षष्ठेद्वादिने शाययित्वा जनान्
भोजयेत् पिता षष्ठमासि कुमारस्य मासि वाप्यष्टमे शि
वे पितृभ्राता पिता वापि कुर्य्यादन्नप्राशनक्रियाम् एवं
वद्देवपूजादिवह्निसंस्करणं तथा पंचधारांतकर्म्मा
णि सम्पाद्य विधिवत् पिता दद्यात्पंचाहुतीस्तत्रशुचि
नाम्नि हुताशने अग्निमुद्दिश्य प्रथमां द्वितीयां वासवं
स्मरन् ततः प्रजापतिं देवं विश्वान्देवान् ततः परम्
ब्रह्माणं च समुद्दिश्य पंचमीमाहुतिं यजेत् ततोऽन्ना
वच्छेद्याद्दत्तं पंचाहुतिः पिता तत्राथवा ग्रहेऽन्य
स्मिन्वस्त्रालंकारशोभितम् क्रोडे निधाय तनयं प्राश
येत्पायसामृतम् पंचप्राणाहुतेर्म्मंत्रैर्भोजयित्वात
पंचयात ततोऽन्यव्यंजनादीनां दत्वा किंचित् शिशोर्मु
खे शंखतूर्य्यादिघोषेण प्राशनं समापयेत् इत्य
न्नप्राशने प्रोक्ते चूडाविधिमतः शृणु तृतीये पंचमे
वर्षे कुलाचारानुसारतः चूडाकर्म्म शिशोः कुर्य्याद्बा
लसंस्कारसिद्धये देवपूजादिधारांतकर्म्म निष्पाद्य
साधकः सत्पात्रे कृतरदेशो वृषगोमयपूरितम् ति
लगोधूमसंयुक्तं शरावं स्थापयेद्बुधः कवोष्णसलि
लं चापि तत्रमेकं सुशाणितं आसाद्य तनयं तत्र जनकः
स्त्रीयवामतः संस्थाप्य जननीक्रोडे कवोष्णसलिलेश्च

नैः वाहिरण्येदशयाजन्मासमार्ज्यशिशुमूर्द्धजान् माघ
याकुशपत्राभ्यांजघ्निमेकांप्रकल्पयेत् मायोलक्ष्मीरिया
जन्मागृहीत्वालोहजेत्सरम् छित्वातज्जघ्निकामूलेमात
हस्तेनिवेशयेत् कुमारमातारस्ताभ्यामादायगोमयावि
ते शरावेस्थापयेतज्जघ्निंनापितायपिवावदेत् सुरमु
रिअन् शिशोःक्षौरंसमुविसाथयठद्वयम् पठित्वानापिते
पप्रपन्सत्यनामनिपावके प्रजापतिमनुद्दिश्यप्रदद्या
दाहुतित्रयम् नापितेनकृतक्षौरंस्नापयित्वाशिशुंततः
वस्त्रालंकारमाल्येनभूषयित्वाग्निसन्निधौस्ववामभागे
संस्थाप्यस्विष्टिकृद्धोमसमाचरेत् प्रायश्चित्तंततःकृत्वा
दद्यात्पूर्णाहुतिंपितामातायाशिशोतेकुशलेकृतेता
विश्वकृद्विभुः पठित्वेनशिशोःकर्णस्वर्णमय्याशला
कयाराजन्यालोहमय्यावाकर्णवेधंप्रकल्पयेत् श्रापो
हिष्ठेतिमंत्रेणअभिषिच्यसुतंततः शान्त्यादिदक्षिणां
कृत्वाचूडाकर्मसमापयेत् गर्भाधानादिचूडान्तंसमा
नंसर्वजातिषु शूद्रसामामनजातीनांसर्वमेतदमंत्रकं
जातकर्मादिचूडान्तेकुमार्यास्त्वमंत्रकम् कर्णवेधप
वभिर्वर्णैरेकंनिष्क्रमणंविना श्रूयतेद्विजातीनामु
पवीतक्रियाविधिः यस्मिन्कृतेद्विजन्मानोदेवपैत्रा
धिकारिणः गर्भाष्टमेऽष्टमेवाब्देकुर्यादुपनयंशिशोः
षोडशाब्दाधिकोनोपनेतव्योनिष्क्रियोऽपिसः कृतनित्य
क्रियोविद्वान्पंचदेवान्समर्चयेत् गौर्यादिमातृकाश्चैव

म.
क्रि. तं
५४

54

ववमथ धारां प्रकल्पयेत् हविश्राद्धं ततः कुर्य्यात् देवता
पितृतृप्तये कुशण्डिकोक्तविधिना यागहोमं तमाव
रेत् प्रातः कृताशनेवालं सुस्नातं समलंकृतम् शिखा
विनाकृतं गौरं क्षौमाम्बरविभूषितम् छायामण्डपमा
नीय सम्मुद्वहुताशितः समीपे चात्मनो वामे संस्था
प्य विमलासने शिष्यं वदेद्ब्रह्मचर्य्यं कुरुष्व तत्ततः
शिष्युः ब्रह्मचर्य्यं करोमि इति गुरवे विनिवेदयेत् ततो गु
रुः प्रसन्नात्मा शिशवे शान्तचेतसे काषायवाससी द
द्यात् दीर्घापुष्टाय वर्द्धसे मौञ्जी कुशमयी वापि त्रिवृता
ग्रन्थिसंयुताम् कृष्णीवमेखलां दद्यात् काषाया स्वधा
रिणे मायामुखार्य्य सुभगा मेखला स्यात् शुभप्रदा इम
क्वाम मेखलावडामोनीतिषिद्गुरोः पुरः यज्ञोपवीतेन प
रमं पवित्रं बृहस्पतेर्यत्सहजं पुरस्तात् आयुष्यमग्र्यं
प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः मंत्रेणानेन
शिशवे दद्यात् कृष्णाजिनान्वितम् यज्ञोपवीतं दण्डञ्च
वैण्वं खादिरं चवा पालाशमथवा दद्यात् ततो रहत
सम्मुद्ववम् आपो हि ष्ठा इति मंत्रेण मायया पुटितेन वै वि
गाहस्या कुशाम्भोभिः तदण्डोपरीतिनम् अभिषिच्य
ततस्तोयैः पूरयेद्बालकाञ्जलिम् तदञ्जलिर्दिनेशाय
दातारं ब्रह्मचारिणम् तच्चक्षुरिति मंत्रेण दर्शयेद्भास्करं
गुरुः दृष्ट्वा भास्करमाचार्य्यो वदेन्मानवकं ततः भम व्र
ते मनो ये हि मम चित्तं ददामि ते जष्टस्यैकमना वतसम

मवाचोःस्तुनेशिवम् हृदिस्पृष्ट्वापठितेनेकिन्नामासी
तिनेवेदेत् शिष्योऽमुकशर्माहंभवंतमभिवादये
कस्त्वंब्रह्मचारीतिगुरोःपृच्छतिपार्वति शिष्यःसाव
हितोब्रूयाद्भवतोब्रह्मचार्य्यहम् इत्थंसब्रह्मचारीत
माचार्य्यस्तेहुताशनः इत्युक्त्वासद्गुरुःपश्चाद्देवेभ्यस्त
समर्पयेत् प्राजापतयेवत्ससवित्रेवरुणायच ए
श्रियैविश्वेदेवेभ्यःसर्वेदेवेभ्यएवच समर्पयामितेस
र्वैरत्रेतत्वानिरंतरम् ततोमाणवकोवह्निंदक्षिणाव
र्त्तयोगतः गुरुश्चदक्षिणोहस्तस्थासनेपुनराविशेत्
गुरुःशिष्येणसंस्पृष्टःसमृद्धवहुताशने पंचदेवान्
समुद्दिश्यदद्यात् पंचाहुतीःप्रिये प्रजापतिस्तथाश
क्रोविष्णुर्ब्रह्माशिवस्तथा मायादिवह्निजायांतैर्जुहु
यात्स्वस्वनामभिः अनुक्रमेणसर्वत्रविधिरेवप्रकीर्त्ति
तः ततोदुर्गामहालक्ष्मीःसुंदरीभुवनेश्वरी इत्यादिद
शदिक्पालाभास्करादिनवग्रहाः प्रत्येकनाम्नाहुते
नान्वासमाच्छाद्यबालकम् पृच्छेन्माणवकंप्रोक्ता
ब्रह्मचर्य्याभिमानिनम् कोवाश्रमस्तेतनयब्रूहिकिंते
मनोगतम् ततःशिष्यःसावहितोधृत्वागुरुपदद्वयम्
करोतुभामाश्रमिणंब्रह्मविद्योपदेशतः एवंप्रार्थ्यय
मानस्यदक्षकर्णेशिशोस्तदा श्रावयित्वात्रिधातारंस
र्वमंत्रमयंशिवे व्याहृतित्रयसंयुक्तांसावित्रींश्रावयेद्
गुरुः ऋषिःसदाशिवःप्रोक्तश्छंदस्त्रिष्टुबुदाहृतम् अ

म:
ति ते·
५५

55

धिष्ठात्रीत्तु सावित्रीमोक्षार्थे विनियोगिता आदौ तत्स
वितुःपश्चाद्वरेण्यंपदमुच्चरेत् भर्गःपदान्तेदेवस्यधीम
हीतिपदंवदेत् ततस्तुपरमेशानिधियोयोनःप्रचोद
यात् पुनःप्रणवमुच्चार्य्यसावित्र्यर्थंगुरुर्वदेत् अक्षरा
त्मकतारेणपरेशःप्रतिपाद्यते यानाहूतोवमस्तुष्टोय
देवःप्रकृतेःपरः असौदेवस्त्रिलोकात्मात्रिगुणेवाप्य
तिष्ठति अतोविश्वमयंब्रह्मवाच्यंव्याहृतिभिस्त्रिभिः
ताव्याहृतिवाच्योयःसावित्र्यात्तेयएवसः जगद्रूपस्य
सवितुःसप्तर्षिदीप्यतोविभोः अन्तर्गतंमहद्वर्च्चोवरणी
ययतात्मभिः ध्यायेमतत्परंसत्यंसर्वव्यापिसनातन
म् योभर्गःसर्वसाक्षीशोमनोबुद्धीन्द्रियाणिनः धर्म्मार्थ
काममोक्षेषुप्रेरयेद्धिनियोजयेत् इत्यर्थयुतोब्रह्मवि
द्यामादिश्यसद्गुरुः शिष्यंनियोजयेद्विगृहस्थाश्रम
कर्म्मसु ब्रह्मचर्य्यविनिवेशवतस्तदानीपरिमजनाम्भ
वोदितमार्गेणदेवान्पितॄणसमर्च्चय ब्रह्मविद्योपदे
शेनपवित्रेनकलेवरम् ग्रामागृहस्थाश्रमितांतदुक्तं
कर्म्मकलापयज्ञोपवीतद्वयंदिव्यवस्त्रालंकरणानिच
गृहाणपादुकाछत्रगन्धमाल्यानुलेपनम् ततःका
षायवसनंकृष्णाजिनसमान्वितम् यज्ञसूत्रमेखला
चदण्डभिक्षाकरण्डकम् आचारादर्जिताभिक्षासमध्य
गरेवशिवे शुद्धोपवीतयुगलंपरिधायाम्बरंशुभंगन्ध
माल्यधरस्तुसौनिष्ठेदाचार्य्यसन्निधौ ततोगृहस्थाश्र

मिणं शिष्यमेतद्देद्गुरुः जितेंद्रियः सत्यवादी ब्र
ह्मज्ञानपरो भव स्वाध्यायाश्रमकर्माणि यथा धर्मेण
साधय इत्यादिश्य द्विजपश्चात् समुद्रवहुताशने
मायादिप्रणवोतेन भूर्भुवः स्वस्त्रयेणव होवयित्वादि
धाचार्य्यैः स्विष्टिकृद्धोममाचरन् दत्वापूर्णाहुतिं भद्रं
व्रतकर्म्म समापयेत् जीवसेकादिसंस्कारो व्रतेनातः पि
तृतोनव उद्वाहः पितृतो वापि स्वतोऽपि सिध्यातिथिये
विवाहादिकृतस्नानः कृतनित्यक्रियः कृती पंचदेवा
नसमभ्यर्च्य गौर्यादिमातृकास्तथा वसोर्धारां कल्प
ताहृद्धिश्राद्धं समाचरेत् रात्रौ प्रतिश्रुतं पात्रे गीतवाद्य
भरः सरम् छायामण्डपमानीय उपवेश्य वरासने वा
सवाभिमुखे दातापश्चिमाभिमुखो विशेत् आचम्यच
स्तिमृदिंच कथयेद्ब्राह्मणैः सह साधुप्रश्नं वरं पृच्छे
दर्घेनार्घमेव वदेत् प्रश्नोत्तरेनीत्वापर्यायेवरमर्घ
येत् समर्पयामि वाक्येन देयद्रव्यं समर्पयेत् पाद्यो
रर्पयेत् पाद्यं शिरस्पृष्टं निवेदयेत् आचामं वदने दद्या
द्गन्धमाल्यं स्ववाससी दिव्याभरणरत्नानि यज्ञसूत्रं
समर्पयेत् ततस्तु भाजने कांस्यकृतादधिघृतमधु
समर्पयामि वाक्येन मधुपर्कं करेऽर्पयेत् वरोऽपिपा
त्रेमादाय वामे पाणौ निधाय च दक्षांगुष्ठानामिकाभ्यां
प्राणाहुतमंत्रकैः पंचधान्यायतत्पात्रमुदीच्यां दि
शि धारयेत् मधुपर्कं समर्प्यैवं पुनराचामयेद्वरम् ॥

वीक्षिताभ्यांजामातृर्विष्टरस्यजानुदक्षिणम् स्पृष्ट्वावि
स्मृतन्तमदितिमामसपत्ननिषीष्टस्ततः समुल्लिख्यनिमि
त्तानिब्राह्मणयाद्वरस्युत्तमम् गोत्रप्रवरनामानिप्रत्येकं
प्रपितामहात् षष्ठ्यन्तानिसमुच्चार्य्यवरस्यजनका
वधि द्वितीयान्तेवरंब्रूयात् गोत्रप्रवरनामभिः तथैव
कन्यामुल्लिख्यब्रह्मोद्वाहेनपणितः दातेभवंतमिम
कान्हणोऽहमितिकीर्त्तयेत् ह्वतोऽस्मीतिवरोब्रूयात्त
तोदातावदेद्वरम् यथाविहितामिमांकन्याविवाहकर्म
कुर्विति वरोब्रूयात्यथाज्ञानंकरवाणीत्यनन्तरम्
ततःकन्यांसमानीयवस्त्रालंकारभूषिताम् वस्त्रान्त
रेणसंछाद्यस्थापयेद्वरसन्मुखम् पुनर्वरंसमभ्यर्च्य
वासोऽलंकरणादिभिः वरस्यदक्षिणपाणौकन्यापा
णिंनियोजयेत् तन्मध्येपंचरत्नानिफलताम्बूलमेव
वादत्त्वावेष्टयित्वातन्तुनावरायविदुषेऽर्पयेत् प्राग्वन्नि
रुपाख्यानेनिमित्ताख्यानमेवच आत्मनःकामसुद्दि
श्यचतदर्थ्यंतेवरंवदेत् कन्याभिधांद्वितीयान्तामर्च्चिता
समलंकृताम् साच्छादनांप्रजापतिदेवताकामुदीर
यन् तुभ्यमहमितिप्रोच्यदद्यात्सम्प्रददेवदत्त वरः
स्वस्तीतिस्वीकुर्य्यात्सम्प्रदातावरंवदेत् धर्मेचार्थे
चकामेचभवताभार्य्ययासह वर्त्तितव्यंवरोवाढमु
क्त्वाकामस्तुतिंपठेत् दाताकामोगृहीतापिकामायात्र
कामिनीम् कामेनत्वांप्रगृह्णामिकामःपूर्णोऽस्तुवावयोः

ततो वदेत् सम्प्रदाता कन्यां जामातरं प्रति प्रजापति
प्रसादेन युवयोर् अभिवाञ्छितम् पूर्णमस्तु शिवे चा
स्तु धर्म्मं पालयतं युवाम् ततश्चाक्ष्यायवलेण सम्प्र
दानां सुमंगलैः परस्परं शुभालोकं कारयेद्वरकन्य
योः ततो हिरण्यरत्नानि यथाशक्त्यनुसारतः जामात्रे
दक्षिणां दद्याद् ऋद्धिमवधारयेत् वरस्तु भार्यायाः सा
र्द्धं तद्रात्रौ दिवसे पिताकुशण्डिकोक्त विधिना वह्नि
स्थापनमाचरेत् योजकाख्यः पावकोऽत्र प्राजापत्यस्म
कः स्मृतः धारान्तकर्म समाप्याथ तु पञ्चाहुतीर्वरः शि
वे दुर्गे तथा विष्णुब्रह्मणे वज्रधारिणे ध्यात्वैकैकं सम्
द्दिश्य जुहुयात् संस्कृतेऽनले भार्यायाः पाणियुगलं
गृह्णीयाद् इस्त्रीरयत् पाणिं गृह्णामि सुभगे गुरुदेव
रता भव गार्हस्थ्यकर्मधर्म्मेण यथावदनुशीलया ह्
तेन स्वामिदत्तेन लाजैर्भ्राताहृतैः शिवे प्रजापतिस
मुद्दिश्य दद्याद् वेदाहुतीर्वधूः प्रदक्षिणीकृत्य वह्निम
स्याय भार्यया सह दुर्गां शिवं रमां विष्णुं ब्राह्मीं ब्रह्माण
मेव च युग्मं युग्मं समुद्दिश्य त्रिस्त्रिधाहवनं चरेत्
अश्ममण्डलिका समारोहो कुर्याद् मंत्रकम् निशायां
चैव तदा स्त्रीभिः पश्येद् ध्रुवमरुन्धतीम् समाहमास
ने सम्यगुपविश्य वरस्तदा स्विष्टिकृद्धोमतः पूर्णाहु
त्यन्तेन समापयेत् ब्राह्मो विवाहो विहितो दोषहीनः स
वर्णया कुलधर्म्मानुसारेण गोत्रभिन्नासापिण्डया ब्राह्म

म·
नि·तं·
५७

57

द्वाहेनययाज्ञामेवपत्नीगृहेश्वरी तदनुज्ञांविनाबाल
विवाहंनाचरेत्पुनः तस्याअपत्येतद्वंशे विद्यमानेकुले
श्वरि शैवोद्भवान्यपत्यानिदायार्हाणिभवंतिनः शैवोत्
दस्वधाश्चैवलभेरन्धनभाजिनः यथाविभवमाच्छ्य
ग्रासंचपरमेश्वरि शैवोविवाहोद्विविधःकुलचक्रेवि
धीयते चक्रस्यनियमेनैकोद्वितीयोजीवनावधि चक्रा
नुष्ठानसमयेस्वगणैःशक्तिसाधकैः परस्परेच्छयोद्वा
हंकुर्याद्वीरःसमाहितः भैरवीवीरचक्रेषुस्वाभिप्रायं
निवेदयेत् आवयोःशाम्भवोद्वाहेभवद्भिरनुमन्यतां
तेषामनुज्ञामादायजप्त्वासप्ताक्षरमनुम् अष्टोत्तरश
ताद्वत्प्रणमेत्कालिकांपराम् ततोवदेत्तांनारमणी
कौलानांसन्निधौशिवे अकैतवेनचित्तेनपतिभावेन
मावृणु गन्धपुष्पाक्षतैर्हेत्वासाकौलादयिता ततःस
श्रद्धयानादेवेशिकरोद्यात्करोपरि ततोऽभिषिंचेत्
चक्रेशोमंत्रेणानेनदम्पती तदाचक्रस्थिताःकौलाब्रूयुः
स्वस्तीतिसादरम् राजराजेश्वरीकालीतारिणीभुवनेश्व
री बगलाकमलानित्याभवानीरक्षन्तुभैरवी अभिषिंचे
तद्वादशाधामयुनावीर्ध्यापाद्यसा ततस्तौप्रणतौवि
द्वान्श्रावयेद्वाग्भवंरमाम् यद्यदंगीकृतंतत्रताभ्यां
म्यापालयतस्ततः शाम्भवोक्तविधानेनकुलीनाभ्यां
कुलेश्वरि वयोवर्णविचारोऽत्रशैवोद्वाहेनविद्यते अ
सपिण्डांभर्तृहीनामुद्वहेच्छम्भुशासनात् परिणीता

शैवधर्म्मचक्रनिर्धारणेनयाश्रपमार्थीकृतंदृष्ट्वाव
कानीतेनतान्यजेत् शैवभार्य्योद्भवापत्यमनुलोमेन
मातृवत् समाचरेद्विलोमेनतत्सामान्यजातिवत्
एषांसंकरजातीनांसर्वत्रपितृकर्म्मसु भोज्यप्रदाने
कौलानांभोजनेविहितंभवेत् त्वेणास्वभावजेदेवि
प्रियेभोजनमैथुनम् सेतेपापहितार्थायशैवधर्म्मे
निरूपितम् अंतएवमहेशानिशैवधर्म्मनिषेवणं
प्रभुर्भवतिनान्यथा इतिश्रीमहानिर्वाणतंत्रेसर्वतं
त्रोत्तमोत्तमेसर्वधर्म्मनिर्णयसारेश्रीमदाद्यासदा
शिवसंवादेकुशण्डिकादशविधसंस्कारविधिर्नाम
नवमोल्लासः ९ दशमोल्लासः ॥ श्रीदेव्युवाच
कुशण्डिकाविधिर्नाथसंस्काराश्चदशश्रुताः वृद्धिश्राद्ध
विधिंदेवकृपयामेप्रकाशय कस्मिन्कस्मिंश्चसंस्का
रेप्रतिष्ठासुचकास्वपि कुशण्डिकाविधानंचवृद्धिश्रा
द्धंचशंकर कर्त्तव्यंवानकर्त्तव्यंतन्ममावदतत्त्वतः
मत्प्रीतयेमहेशानजीवानांमंगलायच श्रीसदाशिव
उवाच जीवसेकाद्विवाहान्तदशसंस्कारकर्म्मसु यत्र
यद्विहितंभद्रेसविशेषप्रकीर्त्तितम् तदेवकार्य्यम
त्रेजेस्त्वविहितमिच्छुभिः अन्यत्रयद्विधातव्यंतच्छृणु
ष्वरानने वापीकूपतडागानांदेवप्रतिकृतेस्तथा
गृहारामव्रतादीनांप्रतिष्ठाकर्म्मसुप्रिये सर्वत्रपंचदे
वानांमातृणामपिपूजनम् वसोर्धारांचकर्त्तव्यांवृद्धि

म: ति तं ५८ श्राद्धकुशण्डिके स्त्रीणां विधेयं कर्मसु वृद्धिश्राद्धं न विद्यते
देवतापितृस्थानार्थं भोज्यमेकं समुत्सृजेत् देवतार्थं तु ने
नत्रवस्त्रधाराकुशण्डिका भक्ष्यक्रियाविधानमाकर्णितं
कमलानने पुत्रश्च पौत्रो दौहित्रो ज्ञातयो भगिनीसुतः जा
मातश्चैव देवपितृशालाः प्रतिनिधयो शिवे वृद्धिश्राद्धं प्र
वक्ष्यामि तत्त्वतः शृणु कालिके कृत्वा नित्यादिकं कर्म मान
वः सुसमाहितः गंगायज्ञेश्वरं विष्णुं वा स्त्रीश भूपतिं के
त् ततो दर्भमयान् विप्रान् कल्पयेत् प्रणवं स्मरन् पंच
भिर्नवभिर्वापि सप्तभिस्त्रिभिरेव वा निर्गर्भैः अकुशैः
साग्रैर्हस्तिमात्रवर्णयोगतः साईदुपावर्तनेन दुर्डीत्रे
रवयेद्द्विजान् वृद्धिश्राद्धे पार्वणे चैव षड् विप्राः परिकी
र्तिताः एकोद्दिष्टे कथितः एक एव द्विजः शिवे ततो
विप्रान् कुशमयान् एकस्मिन्नेव भाजने कौवेराभिमुखा
न् कृत्वा स्नापयेत् सुनासुधीः ह्रीं शन्नो देवीरभीष्टये श
न्नो भवंतु पीतये शंयोरभिस्रवंतु नः ततस्तु गन्धपुष्पा
भ्यां पूजयेत् कुशभूसुरान् पाश्चिमे दक्षिणे चैव युग्म
युग्मक्रमात्सुधीः षट्पात्राणि सदर्भाणि स्थापयेत्तुल
सीतिलैः पात्रद्वयं पश्चिमायां याम्यपात्रचतुष्टयम् पूर्वा
स्यामुत्तरमुखान् षड् विप्रानुपवेशयेत् देवपक्षे प
श्चिमायां दक्षिणे वामयाम्ययोः पितृमातामहस्था
पिपतो द्वौ द्वौ विधिपार्वति नान्दीमुखाश्च पितरो ना
न्दीमुखाश्च मातरः :: :: :: ::

58

मातामहादयोः एवं मातामह्यादयोः पित्र श्राद्धेना
न्माभ्युदयिके समुल्लेख्यो वरानने दत्वा वर्न्मेमोमरा
स्योद्देवं कर्म्म समाचरेत् वामावर्त्तेन दत्वा स्यः पितृक
र्म्माणि स्माययेत् सर्वकर्म्म प्रकुर्वीत देवादिक्रमतः
शिवे लक्ष्मनान्मातृमातृणां श्राद्धं तद्धि फलं भवेत कौ
वेराभिमुखो ग्रुत्वा वाक्यं देवे प्रकल्पयेत् याम्यास्यः क
ल्पयेद्वाक्यं पित्रे मातामहे पित्र तन्नादौ देवपक्षे तु वा
क्यं शृणु सुविस्मिते कालादीन् निमित्तान् समुल्लिख्य
ततः परं तत्तत्कर्म्माभ्युदयार्थमुक्त्वा साधकसत्तमः
पित्रादीनां त्रयाणां तु मात्रादीनां तथैव च मातामहानां
च मातामह्यादीनामपि प्रिये षष्ठ्यन्ते कीर्तयेन्नाम गोत्रो
च्चारणपूर्वकम् विश्वेषां चैव देवानां श्राद्धं परमुदीर
येत् कुशाभिर्म्मितयोः पश्चात् विप्रयोरहमित्यपि
करिष्ये परमेशानि सत्ताब्रुत्वा वाक्यमीरितम् विश्वान्दे
वान्परिमज्य पितृपक्षे तथैव ति तथा मातामहस्या
पि पितृ ग्रुत्वा प्रकीर्तिता ततो जपेद्ब्रह्म विद्यां गायत्री
दशधा शिवे देवताभ्यः पितृभ्यश्च महायोगिभ्य एव
च नमः स्वधायै स्वाहायै नित्यमेव भवन्त्विति पठित्वै
नं त्रिधा हस्ते जलमादाय सत्तमः पंहू फड़िति मंत्रेण
श्राद्धद्रव्याणि शोधयेत् आग्नेय्यां पात्रमेकं तु संस्थाप्य
कुलनायिके रक्षोघ्नं तन्मन्त्रे प्रोच्य यन्त्रं ततो कुरु स्वमे
स्तुकाभाजने तस्मिन् तुलसीदलसंयुतम् निधायम

म॰
नि॰ तं
५९
59

लिले देविदेवादिक्रमतः सुधीः विप्रेभ्यो जलगण्डूषं
दत्वा दद्यात् कुशासनम् ततआवाहयेद्देहान्विश्वा
न्देवान्पितृंस्तथा मातृर्मातामहांश्चापितृश्चामा
तामहीः शिवे आवाह्य पूजयेद्दद्दौ विश्वान्देवांस्ततोय
जेत् पितृत्रयं तथा मातृत्रयं मातामहत्रयम् मातामही
त्रयं चापि पाद्यार्घ्याचमनादिभिः धूपैर्दीपैश्च वासोभिः
पूजयित्वावसाने तु पात्राणि पातनञ्चेत्कुर्याद्देवक्रमा
शिवे मण्डलं रचयेदेकं माषयावतरस्वकम् द्वे द्वे च
मण्डले कुर्यात् ततः तत्पात्रद्वयोरपि वारुणप्रोक्षिते
ष्वेषु पात्रेषु प्रोक्ष्य स्वात्मसाधकः तेन क्षालितपात्रेषु सर्वेषु
करणैः सह पानार्थं पायसान्नानि क्रमेण परिवेशये
त् ततोऽभ्युपवान् दत्वा ह्रीं हूं फडिति मंत्रकैः संप्रसो
न्नानि सर्वाणि विश्वान्देवांस्तथा पितॄन् मातृर्मातामहा
हान्मातामहीः कल्पितान्नं त्ववितं निवेद्य देवीं गायत्री
देवताभ्यस्त्रिधा पठेत् शेषान्नात् पिण्डयोः प्रश्नं कुर्याद्दा
येततः परम् स्तनशौर्यैरततो ये मालूरफलसन्निभा
न् द्विजातयोऽपि नरः पिण्डान् रचयेद्द्वादशप्रिये प्रथमं
तु कल्पयेदेकं पिण्डं ततस्सममम्बिके आत्रेयैर्त्रैरैतेद
भान्मण्डले पवसंधृतान् ये मे कुले लुप्तपिण्डाः पुत्रदा
रविवर्जिताः अग्निदग्धाश्च ये केऽपि व्यालव्याघ्रहता
श्च ये येवान्यवावान्यवा ये ऽन्यजन्मनि वान्यवाः सदहन
पिण्डेनोपायाभ्यां तेषां तृप्तिर्भवतु याम् दत्वापिण्डमपिण्डे

भ्यो मंत्राभ्यां स्तुरवन्दिते प्रक्षाल्य हस्तावाचांतः सावित्रीं
प्रजपेत्ततः देवताभ्यः पित्रिधाजस्वा मण्डलानि प्रकल्पये
त् उच्छिष्टपात्रपुरतः पूर्वोक्तविधिनाबुधः हेहेवमण्ड
लेदेविरवयेत्पितृतः क्रमात् पूर्वमंत्रेण संप्रोक्ष्य कुशा
लेषालेरतत्क्रतो अभ्युक्ष्यवायुनादर्भान्पितृदर्भक्रमा
त् शिवे उद्धृमूलेव मध्येवंश्रीमृत्वान् पिण्डांस्त्रिर्वेदयेत् आ
मंत्रेणेन प्रत्येकं नामोच्चार्य्य महेश्वरि स्वधयाविनरेत्पि
ण्डं यवमाध्वीकसंयुतम् पिण्डांते पिण्डशेषं च विकीर्य्यले
पभाजिनः प्रीणयेत्करलेपेन नैकोद्दिष्टं यं विधि दे
वतापितृमंत्रार्थं सावित्रीं दशधा जपेत् देवताभ्यः पित्रिधा
जस्वा पिण्डान्संपूजयेत्ततः प्रक्षाल्य धूपदीपैश्च निमील्य
नयनद्वयम् दिव्यदेहधरान्पितॄन्स्मृतः कव्यमधरे
विभाव्य प्रणमेद्धीमानिमं मंत्रमुदीरयेत् पिता मे परमो
धर्म्मः पिता मे परमं तपः स्वर्गः पिता मे तन्त्रमोत्तमम
स्याखिलं जगत् ततो निर्म्माल्यमादाय प्रार्थयेदाशिषः पि
तॄन् आशिषो मे प्रदीयंतां पितरः करुणामयाः वेदाः सं
ततयो नित्यं वर्द्धतां बान्धवा मम दातारो मे विवर्द्धतां बहू
न्यन्नानि संतु मे याचितारः सदा संतु मा च याचामि कंचन
देवादितो द्विजान्पिण्डान्विसृजेत्तदनंतरम् तथैव
दक्षिणां कुर्यात्पत्रेषु विप्रवित् गायत्रीं दशधा जप्त्वा दे
वताभ्योऽपि पंचधा दृष्ट्वा वह्निं रविं विप्रमिदं पश्चेत्तत्कृ
तांजलिः इदं श्राद्धं समस्तार्य्यं मार्गंनानात मुदीरयेत् द्वि

म:
नि: तं
६०

60

जो वदेत् सम्यगेव संगं जाते विधानतः अंगं वै गुणा-
शेनार्थं ब्राह्मणा वेदशाखा जपेत् अच्छिद्राभिविधानेन कु
र्यात् कर्म्मसमापनम् पात्रीयाज्ञानि पिंडान्ब्राह्मणा
